वङ्गीयप्रतापम्।

(नाटकम्)

—:०ः—

महामहोपाध्याय-महाकवि-भारताचार्य्य-
श्रीयुक्तहरिदाससिद्धान्तवागीशभट्टाचार्य्य-
प्रणीतम्।

—०—

कलिकाता ४१ संख्यक-देवलेन-नामक-
वर्त्मस्थसिद्धान्तविद्यालयात्
श्रीशशिशेखरविद्यारत्नभट्टाचार्य्येण
प्रकाशितम्।



१३५२ वङ्गाब्दे
सौरफाल्गुनमासे।

वङ्गीयप्रतापम्।

(नाटकम्)

—:०ः०:—

महामहोपाध्याय-महाकवि-भारताचार्य्य-

श्रीयुक्तहरिदाससिद्धान्तवागीशभट्टाचार्य्य-

प्रणीतम्।

—०—

कलिकाता ४१ संख्यक-देवलेन-नामक-

वर्त्मस्थसिद्धान्तविद्यालयात्

श्रीशशिशेखरविद्यारत्नभट्टाचार्य्येण

प्रकाशितम्।



१३५२ वङ्गाब्दे

सौरफाल्गुनमासे।

कलिकाता ४१ संख्यकदेवलेनस्थित-सिद्धान्तयन्त्रे
श्रीहेमचन्द्रभट्टाचार्य्येण मुद्रितम् ।



महामहोपाध्याय-महाकवि-भारताचार्य्य-श्रीहरिदाससिद्धान्तवागीशः ।

निवेदनम् ।

भगवदनुग्रहेण मुद्रापितं वङ्गीयप्रतापम् । अस्ति च रूपकरचनाया- मनन्योपायतया कवेः कल्पनास्वाधीनता । अतएव हि प्राचीनाः कवयो यथेच्छमेवानल्पकल्पनया चमत्कारिणीं रचनाचातुरीमदर्शयन् । मया तु सम्भवति सत्याश्रयणे मिथ्याश्रयणमन्याय्यमिति समञ्जसमनेक इति रसमनुसरतैव नाटकमिदं निरमायि ; तावतैव च सहृदयानां हृदयामोदि सञ्जातमित्यमानि च ।

तथा च १३४९ वङ्गाब्दे सौराषाढ़स्य सप्तविंशवासरनिशायां कोटालिपाड़ायामूनशियाग्रामे मद्भवने प्रथममिदमुदयनसमितिसदस्यै- रभिनीतम् । १३५२ वङ्गाब्दे सौरज्यैष्ठस्य नवमवासररजन्यां कलिकाता- नगर्य्यां मिनार्भारङ्गालये तैरेव द्वितीयवारमभिनीतम् । १३५२ वङ्गाब्द एव च सौरश्रावणस्यैकादशदिवसयामिन्यां कलिकातायामेव ष्टाररङ्गमञ्चे तैरेव तृतीयवारमभिनीतम् । एतच्चाभिनयत्रयमेव दर्शकानां विशेष- विदुषां साधुवादसहस्रमलभत । अपि च १३५२ वङ्गाब्दे सौरभाद्रस्य त्रयोविंशदिवसे कलिकाता-विवेकानन्द-बालिकाविद्यालये काचन पुरस्कारवितरणसभा समाहूता । तत्र च वितीर्णानि द्वाविंशत्यभिनेतृभ्यो द्वाविंशतिरौप्यपदकानि । तदानीञ्च सभापतिः सुपण्डितो मैथिलः श्रीयुक्तहरिनन्दनझामहोदयः स्वभाषणावसरे सहर्षमिदमभाषत, यत्— "नाटकमिदं प्राचीनवीररसनाटकानां शीर्षस्थानमधिचकार ।"

तत्र प्रथमाभिनये श्रीमान् कालीपददर्शनाचार्य्यः सर्वं सुष्ठु सम्पादयन् विशेषसम्मानमवाप । द्वितीये तृतीये चाभिनये श्रीमान् शशिशेखर- विद्यारत्नो नाट्यसमाजमिमं सर्वथा समीचीनं परिचालयन् नितरामेव यशस्वी जात इति ।

१३५२ वङ्गाब्दसौरमाघ- षड्विंशदिवसीयम् ।	विनीत— श्रीहरिदासदेवशर्मणः ।

नाट्योल्लिखितव्यक्तिगणः ।

पुरुषगणः ।

सूत्रधारः—प्रस्तावसूचकः ।

पारिपार्श्विकः—अस्य सहचरः ।

प्रतापादित्यः—यशोरराजो नायकः ।

शङ्करचक्रवर्त्ती—अस्य मन्त्री ।

गिरीन्द्रः—अस्यानुचरः ।

विक्रमादित्यः—प्रतापादित्यपिता ।

गोविन्ददासः—कश्चित् वैष्णवः ।

श्रीनिवासः—कश्चित् साधुः ।

वसन्तरायः—विक्रमादित्यस्य पितृव्यपुत्रः ।

भवानन्दः—वसन्तरायमन्त्री ।

नीलमाधवः—शङ्करप्रतिवेशी ।

धीरेन्द्रदत्तः—शङ्करप्रतिवेशी ।

सूर्य्यकान्तगुहः—प्रतापादित्यसेनापतिः ।

सुरेन्द्रनाथघोषालः—नवावसेनानायकः ।

आकवरः—भारतसम्राट् ।

टोडरमल्लः—राजस्वसचिवः ।

मन्त्री—आकवरस्य ।

सेनापतिः—नवावस्य ।

मदनमल्लः—प्रतापादित्यगुप्तचरः ।

सुखमयः— „ „

शेर खाँ—वङ्गीयनवावः ।

तोराब-आलिः—नवाववयस्यः ।

श्रीकृष्णतर्कपञ्चाननः—वसन्तरायाध्यापकः ।

माधवचन्द्र-अविलम्बसरस्वती—प्रतापाध्यापकः ।

बलरामः—भाधवान्तेवासि ।

केशवः—बलरामवयस्यः ।

राघवरायः—वसन्तरायकनिष्ठपुत्रः ।

दुर्ज्जनसिंहः—मानसिंहपुत्रः ।

उदयादित्यः—प्रतापपुत्रः ।

मानसिंहः—आकवरसेनापतिः ।

मुकुन्दघोषः—शङ्करसहायः ।

दुर्गापदः—कश्चिद्ब्राह्मणः ।

वैतालिकः—स्तुतिपाठकः ।

दौवारिकगणः ।

धीवरगणः ।

रवाङ्गतगणः, पण्डितगणः ।

सैनिकगणः ।

स्त्रीगणः ।

कल्याणी—शङ्करस्त्री ।

वामा—अस्याः परिचारिका ।

पद्मा—प्रतापमहिषी ।

नर्त्तकीगणः ।

वङ्गीयप्रतापम्।

नाटकम्।

-:००:—

प्रथमोऽङ्कः।

रङ्गः सर्व्वं जगन्नटी गुणवती माया, नटौ कर्म्मणा,
वेशो दृश्यमिदं छाया यवनिका, यः सूत्रधारः स्वयम्।
कुर्व्वन् प्राणि-सुखासुखाद्यभिनयं द्रष्टाप्यसौ यः सदा
चिन्तातीतगुणः शिवस्त्रिभुवनश्रेयान् ददातु श्रियम्॥१॥

अपि च,

चन्द्रस्ते कमलालये! भवति कः सम्पर्कतः, सोदरः,
कोऽयं ते स्तनमण्डले ननु करं दत्तेऽधुना निर्भयम्।
इत्युक्तेव कृतस्मिता मधुभिदा मुक्तांशुकैकस्तनी
चन्द्रे चन्दति सौधशेखरगता लक्ष्मीश्चिरं पातु वः॥२॥

नान्द्यन्ते सूत्रधारः। हन्त! परमरमणीया परिषदेषा संवृत्ता। तदद्यमयैनामनुरूपरूपकप्रयोगेणानुरञ्जयामः। (नेपथ्याभिमुखमवलोक्य) पारिपार्श्विक! इतस्तावत्।

प्रविश्य पारिपार्श्विकः। भाव! करणीयमनुज्ञायताम्।

सूत्र। मारिष! अतिमनोहरोऽयमद्य सभासन्निवेशः। पश्य तावत्—

एका वेशविलासशोभिवपुषां पाश्चात्यशिक्षावतां
वासामात्रजुषां शिखातिलकिनां श्रेणिः परा धीमताम्।
योग्यत्वेन सभापतेः सुविषमापीयं समत्वं गता
कह्लारं नलिनञ्च रज्यति रवौ प्रातर्हि तुल्योज्ज्वलम् ॥३॥

पारि। भाव! क एष सभापतिर्नाम।

सूत्र। धीमान् धियं, वितरणक्षमतां जनोऽर्थी,
प्रेम प्रजा, बलमरिर्भुवनञ्च कीर्त्तिम्।
जानाति यस्य सततं स नर्कीपुरेशः
श्रीमान् नृपेन्द्रवर एष यतीन्द्रनाथः ॥४॥

तदद्य कश्चन देशानुरागनिष्यन्दी सुन्दरः प्रबन्धोऽभिनेतव्य इति सामाजिकाः समादिशन्ति।

पारि। कतमस्तर्हि निश्चेयः?।

सूत्र। अथ श्रूयते पूर्व्ववङ्गेषु कोटालिपाड़ायामूनशियानाम ग्रामः?।

पारि। ननु श्रूयत एव।

सूत्र। तत्र चासीत् काश्यपपुरन्दरात् पञ्चमो बलरामो नाम, तस्य तु कनीयसः सूनो रामदासादधस्तनः सप्तमः श्रीगङ्गाधरात्मजः कुलपरम्परयैवाविच्छिन्नविद्याब्राह्मण्यः किल—

नवद्वीपेशस्य सभाप्रवासी
महाकविप्राप्ययशोऽभिलाषी ।
अङ्काग्निनागेन्दुमिते शकाब्दे
यन्निर्ममे श्रीहरिदासशर्म्मा ॥५॥

तदेवाभिनेतव्यमद्य वङ्गीयप्रतापं नाम नाटकम् ।

पारि । भाव ! शाश्वतमेव शास्त्रावगाहिनां प्रायेण कवित्वमेव सन्दिहन्ति काव्यरसिकाः ।

सूत्र । मा मैवम् ।

दुरूहशास्त्राभिनिवेशिनोऽपि
कान्तं कवित्वं सरसञ्च दृष्टम् ।
महाकठोरस्य महीरुहस्य
किं पल्लवं कोमलमेव न स्यात् ? ॥६॥

पारि । भवतु तावत् । किन्तु परिशङ्कनीयो दुर्ज्जनानां मुखामोदः ।

सूत्र । अये ! माधीयसी तवेयं चित्तवृत्तिः । येन दुर्ज्जनादपि प्रशंसाभिलाषः ।

वमति विषधरश्चेत् साधु पीयूषराशिं
विकिरति किरणं वा शीतलञ्चेत् खरांशुः ।
नहि खलु खललोकात् सत्प्रशंसा तथापि
क्वचिदपि हि जनानां चीयते न स्वभावः ॥७॥

पारि । तथापि पौराणिकान्यपहाय कथमस्मिन्नैतिह्यासिके प्रवृत्तिः ? ।

सूत्र । सम्प्रति हि प्रायेण तादृशो नैसर्गिको चित्तवृत्तिः परिलक्ष्यते । तथा च—

विषमयवनराज्यात् प्राज्यदुर्नीतिपूर्णात्
सुषमविषमभावप्राप्तमिंराजराज्यम् ।
स्वजनकृतमुपेत्य स्मातुमिच्छुः स्वभावात्
तमस इव शशाङ्कं पूर्व्ववृत्तानि लोकः ॥८॥

तत् प्रस्तूयतामिदानीं सङ्गीतम् ।

नेपथ्ये गायति ।

हे सन्तान ! तव जननी ।
धनजनसमन्विता केन अनाथिनी ।
परमुखे दृष्टिकरी परद्वारे भिक्षाकरी ।
यथा दीनहीननारी जीविता विषादिनी ॥
अतिनिद्रापरायण- निरुद्यमपुत्रगण
आलस्यवशजीवन आकुला गौरविणी ॥

पारि । तत् क एष गायन् परिश्रमं मे लघयति ? ।

सूत्र । (विलोक्य) हन्त ! एष खलु शङ्करचक्रवर्त्ती सन्तानेषु मातृसेवामुपदिशन्नरण्यं प्रविशति ।

इति निष्क्रान्तौ ।

—०—

प्रस्तावना ।

अथ प्रविशति सशरशरासनधरः
शङ्करचक्रवर्त्ती ।

शङ्कर । अहो ! सम्प्राप्तोऽस्मि साम्प्रतमवस्थानुरूपं स्थानम् । कुतः

स्वाधीनताविरहितः परिदुर्बलाङ्गः
आक्रान्तिमात्रमतिभीतिपलायमानः ।
अङ्गैः किलाङ्गमभिगुप्य शृगालतुल्यः
घोरं वनं विशति शङ्करचक्रवर्त्ती ॥८॥

यदैव दुरात्मा नवावो मामात्मानुचरजर्जरितानां सज्जनानां साहाय्यकरमाकर्ण्य निग्रहीतुं यतते, तदैव मया निभृतमपक्रामता कृतमिदानीन्तनस्य हिन्दोः सदृशं कर्म्म ।

हन्त ! अधुना प्रायेणैव हि साधवः कारावन्धनम्, असाधवः सयशःपटोन्नतिम्, निरपराधाः प्राणदण्डम्, सापराधाः सादरमुक्तिम्, गुणिनो निग्रहातिशयम्, निर्गुणाश्च परमानुग्रहमनुभवन्ति ।

धिक् धिक् पशुप्रायान् पुरुषान् । येषां हि साहसशून्यं मनः, अलसतामयं शरीरम, काफिर इत्युक्तिः पुरस्कारः, यवनपदलेहनञ्च वृत्तिः । अपि च बलप्रकाशो दुर्बलपीड़ने, सहिष्णुता वेत्रप्रहारे, गाढ़ोद्यमः परमानुगत्ये, सन्तोषः संलापमात्रे, निवृत्तिः स्वाधीनतायाम्, वैराग्यञ्च पुरुषकारे ।

तत् किं न भविष्यति दशापरिवृत्तिर्देशस्य । अवश्यमेव

भविष्यति। न खलु संसारे चिरस्थायि किञ्चित्। किन्त्वत्र पुरुषप्रयोजनम्। तन्मया पुरुषेण भवितव्यमिदानीम्। नहि नहि; किङ्करीशिष्यमात्रसहाया कमलकोमलकलेवरा कल्याणी मे यवनकवलिता भविष्यति। (विचिन्त्य) तत् किमत एव कर्त्तव्यतो निवर्त्तितव्यम्। तदपि न। येन हि—

शत्रुमूलमनुन्मूल्य स्वो न चिन्त्या जिगीषुणा।
अन्धकारमनुत्सार्य्य नह्युषामेति भास्करः॥१०॥

तदहं निर्गतोऽस्मि स्वदेशादुपदेष्टारमन्वेष्टुम्। श्रूयते हि प्राचीनपरम्परया—यदरण्ये गिरिगुहायाञ्च योगिनो निवसन्ति, कथयन्ति च ते नितरामनुगृह्णन्तः सुदूरमपि भविष्यन्तम्। तत् प्रविशामि यावदरण्यमेव। दिष्ट्या च यदि कश्चित्तादृशो लोचनगोचरतामुपेयात्। (इति परिक्रामति)

नेपथ्ये व्याघ्रो गर्जति।

शङ्कर। (आकर्ण्य) अहो! गर्जत्यसौ शार्दूलः। भवतु। यवनप्रतिवेशिना मया न खल्वस्मादल्पमपि भेतव्यम्। यतश्चायम्—

नारीधर्म्मं न हरति, न वा जातिनाशं विधत्ते,
धर्म्मग्रन्थं दलति न च, नो देवमूर्त्तिं भनक्ति।
तीर्थस्थानं कलुषयति नो नापि वास्तूच्छिनत्ति,
शून्यारण्ये भ्रमति निनदन् मम्मु खस्थं हिनस्ति॥११॥

तत् किमपसरामि तावत्। नहि नहि।

यवनग्रहणातङ्कात् पलायनपरायणे ।
मत्यं पशुत्वमापन्ने पशुरेष दयिष्यते ॥१२॥

(विचिन्त्य सविषादम्) हन्त! यवनग्रामितेऽस्मिन् प्रदेशे कुतो नाम प्राणिनां दया ?। अत्र हि हितैषिणोऽपि प्राणहिंसा नित्यं कर्म्म। तदस्य मया कथमप्यनपकारिणोऽपि वधाय यतितव्यम्। (विलोक्य) अहो! भीषणाकृतिरसौ मामाक्रमितुमित एवाभिधावति। (इति शरसन्धानं नाटयति)

व्याघ्रः ससम्भ्रमं प्रविशति।

नेपथ्ये कलकलः।

शङ्कर। (आकर्ण्य) नत् किमनेन किरातसैन्यदर्शनात् प्रद्रुतेन भवितव्यम् ?। भवतु। (इति शरं विमुञ्चति)

व्याघ्रः साटोपं गर्जन् निपतति। •

प्रविश्य सक्रोधदर्पः सैनिकः। को तुमं ?। (क)

शङ्कर। अयि! परिचयस्तावदास्ताम्।

सैनिकः। कहं णाम वावादिदो तुए रणा अणुधाविदो सद्दूलो। (ख)

शङ्कर। युष्माकं राज्ञा खलु हन्तुमेवायमनुधावितः।

सैनिकः। तदो क्खु किं ?। (ग)

(क) कस्त्वम्।

(ख) कथं नाम व्यापादितस्त्वया राज्ञानुधावितः शार्द्दूलः ?।

(ग) ततः खलु किम् ?।

शङ्कर । कृतमुपहसनेन वः साहाय्यमेव कृतं राज्ञः ।

सैनिकः । दिट्ठो क्खु अउव्वो भवं परोवआरो जं अप्पत्थिदोवि रण्णो ज्जेव साहाज्जं करेदि । (घ)

शङ्कर । तर्हि राज्ञः साहाय्यमन्याय्यं भवान् मन्यते ।

सैनिकः । एरिसं साहाज्जं अण्णाअमेत्तं त्ति पलावो दुस्सहदण्डहेदू त्ति सच्चकधा । (ङ)

शङ्कर । साधु, हिंसाहत्यायां दुःसहो दण्ड इति युज्यते खलु विचारः किरातस्येव ।

सैनिकः । हंहो ! सावराहो वि उवालहसि, ता चिट्ठ दाव । (इति निष्क्रान्तः) (च)

ततः प्रविशति प्रतापादित्यो विभवतश्च सैन्यम् ।

प्रताप । ननु को भवानिति विशेषेणावगन्तुमिच्छामि ।

शङ्कर । उपपद्यते खलु सामान्येनावगतस्यैव विशेषजिज्ञासा ।

प्रताप । अभिधीयतां तर्हि सामान्यमेव ।

शङ्कर । अस्मि कश्चिद्ब्राह्मणसन्तानः ।

(घ) दृष्टः खल्वपूर्ब्बो भवान् परोपकारी, यदप्रार्थितोऽपि राज्ञ एव साहाय्यं करोति ।

(ङ) ईदृशं साहाय्यमन्याय्यमात्रमिति प्रलापः, दुःसहदण्डहेतुरिति सत्यकथा ।

(च) हंहो ! सापराधोऽप्युपालभसे । तत्तिष्ठ तावत् ।

प्रताप। तत् किमवैधहिंसा ब्राह्मणवृत्तिः?।

शङ्कर। जिघांसुहिंसा वैधेति सर्वस्यैव वृत्तिः।

प्रताप। भवतु तावत्। परकीयभूमौ कामचारः परमनाचार एव।

शङ्कर। राजन्! अस्वामिका खलु वनभूमिः। तदत्र कामचारोऽपि सर्वस्यैव।

प्रताप। (सविस्मयमात्मगतम्)। अहो! क एष युवा निर्भयमानसो वितनोति वैचक्षण्यम्, विवृणोति च कार्य्येण साहसालङ्कृतं बाहुबलम्। न वा राजतया मां जानन्नपि विनयेन वर्त्तते। अथवा—

सहायशून्योऽपि गुणान्वितो जनः
नैवानुगत्यं भजते प्रभोरपि।
दण्डस्तरीबन्धनरश्मिसंयतः
महाप्रवाहे स्थिर एव लक्ष्यते ॥१३॥

भवतु। पश्यामि तावदस्य चित्तवृत्तिप्रसारम्। (प्रकाशम्) अपि श्रुतिपथं गतस्ते सैन्यकोलाहलः?।

शङ्कर। गत एव।

प्रताप। तर्हि केनचिन्मृगयाविहारिणा शार्दूलोऽयमनुसृत इत्यनुमितमपि?।

शङ्कर। तदप्यनुमितम्।

प्रताप। तर्हि तु भवता शार्दूलवधेनास्माकमपराद्धम्।

शङ्कर। हन्त! बलवन्तो हि दुर्बलानामिदानीं जीवन-मेवापराधं मन्यन्ते।

प्रताप। (स्वगतम्) अहो! तेजस्विनः खल्वस्य यूनः पदे पदे परिलक्ष्यते महतो विषादच्छाया, अनुमीयते च निर्दोष-यौतनाजनितो निभृतक्रोधः। भवतु, पृच्छामि यावत्। (प्रकाशम्) ननु श्रोतुमर्हामि किं संवेगकारणं भवतः?।

शङ्कर। श्रुतेन किम्। यद्भवन्तोऽपि प्रभुशक्तिसम्पन्नाः।

प्रताप। तेन किम्?।

शङ्कर। भवन्तः किल हन्तारो वयञ्च हन्तव्याः।

प्रताप। अहो! सामन्ताः खलु वयम्, न तु राजपुरुषाः।

शङ्कर। तथासत्यपि सत्यमेवाभिहितम्। तथा च—

राजोपांशु निहन्ति राजपुरुषं विश्वस्तमप्यूर्जितं
सामन्तान् विदलन्ति राजपुरुषा भोगार्थलोभाकुलाः।
सामन्ताः परिपीड़यन्त्यनुचितस्वार्थाशया दुर्बलान्
कं वा विश्वसिमः, क्व वा नु रुदिमः केनापि वा प्राणिमः॥१४॥

पार्श्वगतपुरुषः। नैनं भवानितरसामन्तमिव दुरन्त-तयावमन्तुमर्हति। एष हि तत्रभवतो यशोरेशितु-र्विक्रमादित्यस्यात्मसम्भवः सार्थकनामा प्रतापादित्यः। योऽयम्—

देशानुरागपिशुनां किल शैशवेऽपि
साकं चकार शिशुभी रणरूपखेलाम्।
पुत्रं प्रजाश्च सममेव समीक्ष्य दत्ते
तुल्यां पुरस्कृतिमिहापि तिरस्कृतिं वा॥१५॥

शङ्कर। (सविस्मयहर्षधैर्य्यविषादमात्मगतम्) कथमयं विश्रुतकीर्त्तिकलापो भारतसुसन्तानः प्रतापादित्यः। हन्त! अतिक्रान्ता खलु चित्तविकाराविशवशेन राजमर्य्यादा। (सविनयं प्रकाशम्) कुमार! मृष्यतु मूढ़तामिदनीं ब्राह्मणवटोः।

प्रताप। (सहस्तग्रहम्) अलमलमतिकातरतया। परिश्रान्तो भवान्, अस्मिन् पादपच्छाये कथञ्चिद्विश्राम्यतु।

शङ्करप्रतापौ परिक्रम्योपविष्टौ।

प्रताप। (अनुचरं प्रति) गिरीन्द्र! गत्वा परिकल्पतां स्कन्धवारे खल्वमुष्य वासोचितः प्रदेशः।

अनु। जं आणवेदि देओ। (इति निष्क्रान्तः) (क)

प्रताप। किं स्विदकारणमुपप्लुतो भवान् केनापि राजपुरुषेण?।

शङ्कर। कथं भवानिति मावम्, देश एवेति कथं न पृच्छ्यते?।

प्रताप। ब्रूहि तदा देशदशामेव।

शङ्कर। ननु किं स्वयमेव भवन्तो नानुभवन्ति?।

प्रताप। अविदितं वेदितुमिच्छामः।

शङ्कर। प्रथमस्तावत्, राजा खलु प्रजानामवस्थानियन्ता, स चेदसम्यगदर्शी, तर्हि तु कं समाश्रयेत प्रजासमाजः।

प्रताप। इदानीन्तनो भारतसम्राट् अतीवन्यायदर्शीति लोकवादः।

(क) यदाज्ञापयति देवः।

शङ्कर। भवतु नाम। तथापि—

शशिकिरणविहारी वोक्षते नान्धकारं
मलयपवनसेवी ग्रीष्मतापं न वेत्ति।
अनुभवति न सुस्थो रोगिणो वेदनां वा
न च पुनरधिनाथो बुध्यते दीनदैन्यम्॥१६॥

अन्यच्च।

दक्षेषु सत्स्वपि विभुः सकलेन्द्रियेषु
कर्णेन कर्म्म कुरुते किल केवलेन।
एकेन हन्त! विदधच्छ्रुभिविंधेयं
विद्यात् कथं नु स यथायथवस्तुतत्त्वम्॥१७॥

प्रताप। (आत्मगतम्) अहो! परिदृश्यते तावदस्य धियश्चातुर्य्यम्, वस्तुवृत्तानुसारी च विवेकः। अपि च—

एष देशविततामपनेतुं
दुर्दशां यवनजां ध्रुवमिच्छुः।
आशयो हृदिशयो हि जनानां
चेष्टया मुखदृशोरनुमेयः॥१८॥

तदनेन महत् कार्य्यं साधनीयम। किमयमात्मपीड़ाप्रतिविधानपणेनाप्यर्थ्यमानः साहचर्य्यं मे नाङ्गीकुर्य्यात्। अथवा कः खल्वातुरो दीयमानमौषधमुपेक्षेत। भवतु। पृच्छामि यावत्। (प्रकाशम्) भवतस्तावदावेगकारणं श्रोतुमिच्छामि।

शङ्कर। कुमार! भवन्तोऽपि किं न पश्यन्ति। सम्प्रति हि प्रायेणैव यवननायकनिकायः प्रजासमाजस्यातीवदुःसहः संवृत्तः। येन हि-

नवीनस्त्रीमात्रं गणयति विलासोपकरणं
प्रजानां सर्व्वस्वं करगतनिजस्वञ्च मनुते।
तृणस्तैये दण्डं प्रणयति परप्राणहरणं
निरीहाणां खेलाकुतुकमसुभिः पूरयति च ॥१८॥

प्रताप। (सावेगम्) एषां नाम कतमदत्रभवति प्रयुक्तम्?।

शङ्कर। (भत्रैक्लव्यम्) इत्थमकारणमुत्पीड़ितानां तपस्विनां निवेदितममानवेदनो यथाशक्ति साहाय्याय यत्नवानस्मीति चरमुखादाकर्ण्यैव नवाबो मामादिदेश संयमयितुम्।

प्रताप। (सरोषविषादम्) अहो! निर्विचारमत्याचारः। ततः?।

शङ्कर। ततः पुनरहमपि बन्धुविशेषादिदं प्राक्प्रतिपद्य कञ्चन करणीयनियन्तारं महापुरुषमन्विष्यन्निदमरण्यं प्रविष्टोऽस्मि।

प्रताप। तत्र किल सुन्दरवनप्रदेशे का नाम महापुरुषः।

शङ्कर। अत्रैव।

प्रताप। को नाम?।

शङ्कर। भवानेव।

प्रताप। (सनिर्व्वेदम्) वयं यदि महापुरुषाः, हन्त! तर्हि जगत्यां नास्त्येव कश्चित् कापुरुषः। येन हि—

पित्राचार्य्य-कलत्र-पुत्रक-तनू-भस्मावशेषाणुभिः
प्रत्येकं परमाणवः प्रमिलिता यस्यातिपुष्टिं गताः।
तस्मिन् भारत एव पापयवनै रामद्य मानान् मुहुः
सद्वन्धून् वयमेव नेत्रपथगान् स्वार्थादुपेक्षामहे ॥२०॥

अहोवत! व्यक्तिगतक्षुद्रस्वार्थसमीहया विभिन्नभाव एव भारतीयानामशेषानर्थमूलम्। तथाहि—

ज्वलितेष्वनलेषु भीषणं
कणभूतेषु कुतोऽपि कारणात्।
विरसो नयति ध्रुवं लयं
ननु तुच्छस्तृणगुच्छकोऽपि तान् ॥२१॥

शङ्कर। (सहर्षमात्मगतम्) अहो। आविष्कृतः खल्वनेन मदीयमनोभाव एव। तदमुष्य परम्पराधिगता स्वाधीनताप्रीतिः सम्प्रति साक्षादेवोपलभ्यते। तेन हि फलवानयं मे वनप्रवेशप्रयासः। (प्रकाशम्) तत् किं शक्तिमन्तः समुपेक्षन्ते भवन्तः?।

प्रताप। (सविमर्शम्) अहो! सहृदय! दूरारोहिण्यआक्रमियमाशालता न किल फलायालम्। तथा च—

मृदुलमलयवातो भूभृतः किन्नु कुर्य्यात्
किमु पुनरपकुर्य्याद्वारिधेर्वाग्निविन्दुः।
शलभसदृशशक्तिर्मादृशस्त्वादृशो वा
यवनपतिदवाग्नेः किं विदध्याद्विरुन्धन् ॥२२॥

शङ्कर। कुमार! केवलपशुबलोर्जिता हि यवना बाहुबलमेव मन्यन्ते शासनसाधनम्, न वा गणयन्ति गुणमगुणं वा निर्यातयन्ति च निर्विशेषमेव दीनधनिनः। ततश्च—

अत्याचारैर्यवनजनितैर्यद्दगुत्तेजितस्त्वं
देशश्रेष्ठाः सदयहृदयास्तद्वदन्येऽपि मन्ये ।
तुल्यं कार्य्यं भवति नियतं कारणे तुल्यरूपे
एकं वीच्याखिलमपि जनो वेत्ति विच्छिन्नमन्नम् ॥२३॥

प्रताप। (सविस्मयमात्मगतम्) अहो! साधीयानध्यवसायः। मया हि परीचितुमुपन्यस्तेषु वाधेषु प्रतिपदं युक्तियुक्तमेव प्रतिवचनममुष्य। तदयमवश्यमेवोपादेयो महामनस्वी सहायः। (प्रकाशम्) अस्तु नाम निभृतोतिजनाजनानां तथापि शतशो निष्पेषितानामप्येकायनोभावस्तावदसम्भव एव वङ्गीयानाम्। पश्य—

जनः काराबद्धः प्रसभमपराधाल्लघुतरात्
निराहारः क्रूरप्रहरिकृतपीड़ामनुभवन् ।
पशुप्रायो नश्येदपि, न तु यततोन्नमयितुं
शिरांस्येकीभूयच्चणमपि वहन् विक्रमरसम् ॥२४॥

अथवा। सम्प्रति हि—

विधर्म्मधीना वत भारतप्रजा
नदीप्रवाहे पतिता लता तथा ।
नैवोन्नतिं गच्छति निष्फलोद्यमा
परानुगत्यं हि लघीयसां क्रिया ॥२५॥

शङ्कर । सर्व्वमेवावितथमाह कुमारः । किन्तु 'अलीकमनुनयन्तोऽपि समुन्नीयन्ते, वचसा विद्विषन्तोऽपि सद्य एव नश्यन्ति' प्रतिदिनमित्थमवलोकयन्नेव लोकसमाजः कष्टेन पिहितरोषावेशो व्युत्थानविमुखः संवृत्तः । अथ तु—

उत्साहादतिसाहसाच्च सहसा कोऽपि प्रवर्त्तेत चेत्
उच्छेत्तुं यवनान्, स्वतः किल तदा तं तत्र एवान्वियात् ।
विश्लिष्टा हिमविन्दवो नलिनीपत्रे स्थिताः, किन्तु चेत्
एकोऽपि प्रचलेच्चलन्ति सकलाः श्लिष्टाः समीरेरणात् ॥२८॥

तत्र हि—

कश्चित् प्रतापः किल पश्चिमोद्गतः
परः प्रतापोऽप्युदितोऽस्तु पूर्व्वतः ।
क्रमप्रयुक्तादुभयोः प्रतापतः
चिरं प्रतापो यवनस्य नश्यतु ॥२७॥

प्रताप । अपि भवेयुः संहता नाम वङ्गीयाः ? ।

शङ्कर । वाढ़मेव ।

प्रताप । तर्हि भवानेव भवतु पूर्व्वनिदर्शनम् ।

शङ्कर । कथमिव ? ।

प्रताप । अधुनैव मया समं संहत्य ।

शङ्कर । (सानन्दोच्छ्वासम्) हन्त ! कृतार्थोऽस्मि ।

प्रताप । ननु यथार्थमेतत् ।

शङ्कर । (तृणं स्पृशन्) किं बहुना, प्राणानपि पणीकृत्य भवन्तमनुवर्त्तिष्ये ।

प्रताप। (भक्तिगद्‌गदमञ्जलिं बद्ध्वा) अयि मातर्हीनबमहिंनि! सर्व्वमङ्गले!

जने स्थिरमलच्छ्ययोरपि सतोरसत्कल्पयोः
परं दलितयोः परं नियतमीश्वरेच्छाकृतम् ।
इदं सुनघु मेलनं भवतु नौ महामिलने
निदानमणु वस्तुनोरिव जगद्विधानादितः ॥२८॥

इति निष्क्रान्ताः सर्व्वे ।

—:•:—

सहायलाभो नाम प्रथमोऽङ्कः ।

—•—

द्वितीयोऽङ्कः ।

——:००:——

अथ प्रविशति देवतामन्दिराङ्गने जपमालाहस्तो विक्रमादित्यः ।

विक्रमा। (सनिर्वेदम्) हन्त भोः! परमदुर्लभा खलु शान्तिः संसारे। येन हि अश्रान्तपरिश्रमसङ्कुलं कर्म्मजीवनमतीतम्, सुविस्तीर्णमर्जितमिदं यशोरराज्यम्, चतुरचूड़ामणिः श्रीमतो वसन्तस्य हस्ते विन्यस्तश्चास्य ममस्तो भारः, वत्सः प्रतापोऽपि नितरामसाधारणः कर्म्मनिपुणः संवृत्त, जराजीर्णश्चास्मि, तथापि हृदयमहर्निशं परिस्पन्दते विशेषसमृद्धिसाधनाय। अतएव—

सांसारिकं क्रमविवर्द्धि समाप्य कार्य्यं
यः शान्तिमिच्छति स तां न कदाप्युपैति।
नद्यां विगाहितुमना विरते तरङ्गे
वायद्ये ध्रुवमपूर्णमनोरथः स्यात् ॥१॥

अहो! विचित्रा मनोवृत्तिर्मादृशानाम्। तथा च—

कैशोरे रमणीययौवनसुखम्, तस्मिन् पुनः प्रौढ़गं
नैपुण्यं प्रविसारि, तत्र च जराविश्राममन्विष्टवान्।
किन्त्वस्मिन् स्पृहयामि विश्लथवपुस्तां पूर्वपूर्वां दशां
मन्ये खल्वनुभूयमानविषयं कष्टं मनो मन्यते ॥२॥

अतएव तावदवलम्बितं विरागिवैष्णवानां साहचर्य्यम् । यदीदानीमनेनापि मनः शान्तिसोपानमुपेयादिति । अथवा निष्फला खल्वियमाशा । कुतः—

मलिनं ननु मादृशां मनो
न भवेत् सङ्गवशात् सतां शुचि ।
नवकाञ्चनसञ्चयाश्रितं
नहि लौहं समुपैति पीतताम् ॥२॥

(उद्यानमवलोक्य) अत्र हि देवतायतने प्रतिदिवसमोदृशावसितवेलायामात्मप्रभविष्णवो वैष्णवा गोविन्ददासप्रभृतयः समवेताः समनुतिष्ठन्ति सङ्गीतालापम् । तत् कथमद्य चिरयन्ति समागन्तुम् । (पुनरवलोक्य) अयमसौ श्रीनिवाससनाथो गोविन्ददासः सम्प्राप्तः । हरे ! नारायण ! हरे ! नारायण ! ।

ततः प्रविशति गोविन्ददासः श्रीनिवासश्च ।

विक्रमः । (यथाक्रममभिवाद्य) इदमास्तीर्णमासनम् । उपविश्यताम् ।

श्रीनिवासः । (दिगन्तरमवलोक्य) ईर्षामलिनमनसां विफलो गङ्गावासप्रयासः । (इत्युपविशति)

उपविशन् गोविन्ददासः । महाराज ! अपि सम्पन्नमद्य समीचीनमाराधनं हरेः ? ।

उपविश्य विक्रमादित्यः । कुतो नाम गङ्गावगाहनं कूपमण्डूकानाम् ।

गोविन्द। तत् किमद्यापि प्रतिबन्धिनो विषयपर्य्यालोचना?।

विक्रमा। यथाकम्।

गोविन्द। श्रूयते किल श्रीमन्महाराजो वसन्तरायः परं प्रावीण्यमुपगतो विषयेष्विति। तत् कथमद्यापि तवेदृशं विषादवैमनस्यम्?।

विक्रमा। मम मन्दभाग्यतया। यत्तादृशोऽपि श्रीमान् वसन्तो विषयविशेषे संशयानः खल्वद्यापि मामुद्वेजयति। तन्मन्ये—ईदृशादेव विषयोपप्लवात् पश्चाद्गतो वानप्रस्थोपदेशो महर्षीणामिति।

गोविन्द। भवतु तावत्। तथापि न खलु सम्भवति भवादृशानामीदृशनैराश्यम्। कुतः—

कृत्वा यथाशक्ति समागतक्रियां
ध्येयं पुनर्ध्यायति पूर्ववद्बुधः।
सरित्प्रवाहो हि शिलासमाहतो
विवृत्य किञ्चित् पुनरेव धावति॥४॥

विक्रमा। अहो! कति सन्ति संसारे जनकराजर्षयः, येन हि तादृशं मनोनैपुण्यमुपपद्यते। भवतु, प्रस्तूयतामिदानीं हरिनामालापः।

गोविन्द। अद्य खलु प्रथमो वारः श्रीनिवासस्य।

श्रीनि। (गोपीयन्त्रं वादयन् गायति)

जीव ! श्रीनरदेहो

निमेषे हि नाशमेति किं मानमहो ।

गृहं त्यज वनं व्रज

हरिं भज किमिच्छसि हो ।

नारी नरः प्रनश्वरः

स्थिरतरः कोऽपि किमाहो ।

विक्रमा । अहो ! निर्व्वेदविधायि गीतम् ।

श्रोनि । (दिशं विलोक्य)

नयनमुन्मील्य परदारदर्शनादरमिह जन्मान्धता ।

परनिन्दावादादतीवश्रेयस्करी चिरमूकता ।

विलोभिनः प्राचीनात् प्रेमास्पदं मे तरुणीपरस्तरुणः ।

गोविन्द । (जनान्तिकम्) अस्य हि क्रमेणोपचीयते शिरोविकारः ।

विक्रमा । (जनान्तिकम्) भवतु नाम । तथापि तावदीदृशी वचनावली नितरामाविष्करोति सारार्थम् ।

श्रोनि । (ऊर्द्धमवलोक्य)

अर्थ एवानर्थमूलम् ।

वैराग्यादेव विच्छिद्यते संसारतन्तुः ।

वैधेयतनयालाभाज्जन्मवन्ध्यता किल शान्तिनिदानम् ।

विक्रमा । यातु । भवदीयमिदानीमाकर्णयामि ।

गोविन्द । (गायति)

अबोधमानव! राजति भगवान्
अनिले अनले दिवि भुवि जले सर्व्वशक्तिमान्।
मृग इव वने चरसि भुवने तदीयान्वेषणे किमुत भक्तिमान्॥
त्वहमि मनसि यदि चिन्तयसि तदा तु भवसि सकलफलवान्॥

विक्रमा। (सोल्लासम्) साधु, साधु। ललितमधुरा त्वदीयं पदावली नितरामाप्याययति श्रवणयुगलम्। दुरवगाह्यो भावमहिमा च शीतलयति संसारसन्तप्तं मनः।

गोविन्द। राजन्! प्रकाशितस्तावदयं महानुपायो महाप्रभुणा। तथाहि—

प्रकृतामृतं ननु निपीय मानवः
सुलभां व्रजत्यमरतां विनश्वरीम्।
हरिनाम नाम परमामृतं पिबन्
अमृतं ध्रुवन्तु लभतेऽतिदुर्लभम्॥५॥

विक्रमा। साधुसत्तम! भवन्त एव धन्याः, य एवं जानन्ति।

गोविन्द। के नाम मादृशाः। ये पुनरेकान्तमेव चिन्तयन्ति चिन्तामणिं त एव धन्याः।

ततः पतति रक्ताक्तः शरविद्धश्छिन्नपक्षो।

गोविन्द। (विलोक्य) हरे! नारायण! हरे! नारायण! (इत्युत्थायापसरति)

श्रोनि। (अपसरति)

विक्रमा। (विलोकयन्नपसृत्य) हा हन्त! हा हन्त! कोऽयं दुराचारः। (गोविन्ददासं प्रति) साधुसत्तम! न गन्तव्यं न गन्तव्यम्। कः कोऽत्र भोः।

प्रविश्य दौवारिकः। आणवेदु देश्रो। (क)

विक्रमा। तूर्णमवगत्य विज्ञाप्यतां कस्येदं दुर्व्यवसितमिति।

दौवा। तह। (इति निष्क्रान्तः) (ख)

गोविन्द। धिक्! ईदृशो नाम हिंसा नितान्तनृशंसवृत्तिः। येन हि—

> कुतूहलं पूरयितुं हि केवलं
> नरः परं यः प्रणिहन्तुमर्हति।
> स मूढधीर्लोहितलोहितां तनुं
> निकृत्य कण्ठं निजमीक्षितुं क्षमः ॥६॥

विक्रमा। कष्टम्। नितान्तदुर्दिनमद्य प्रभातमस्माकम्। तथा च—

> सुरसरित्सलिले पतिता सुरा
> व्यथयते न तथा हृदयं सताम्।
> हरिपरायणसाधुजनान्तिके
> विशसनं बत जीववतो यथा ॥७॥

श्रोनि। (अन्तरालाभिमुखः)

(क) आज्ञापयतु देवः। (ख) तथा।

चन्द्रकलङ्कादपि विप्रियः साधुजनापवादः।
दुर्जनमैत्रीतः सज्जनवैरमपि श्रेयः।
नित्यमन्तोषी शत्रुभूतं न पश्यति।

प्रविश्य दौवारिकः। जेदु जेदु देओ। (ग)

विक्रमा। मन्त्ववगतं कस्येदं दुर्य्यवसितमिति?।

दौवा। अवगदं। (घ)

विक्रमा। कस्य?।

दौवा। देव! तस्स। (ङ)

विक्रमा। आः! कस्य?।

दौवा। (सभयम्) पसीददु देओ। (च)

विक्रमा। ब्रूहि कस्य?।

दौवा। णं कुमारस्स। (छ)

विक्रमा। (सक्षोभम्) तदिदं प्रमाणीकरोति जम्मपवम्। भवतु। वसन्तममात्यभवानन्दञ्च द्रष्टुमिच्छामि।

दौवा। जं आणवेदि देओ। (इति निष्क्रम्य वसन्त-रायभवानन्दाभ्यां सह पुनः प्रविश्य) एसो देओ, ता उपसप्पदु कणिट्ठमहाराओ अमच्चो अ। (ज)

(ग) जयतु जयतु देवः। (घ) अवगतम्।

(ङ) देव! तस्य। (च) प्रसीदतु देवः।

(छ) ननु कुमारस्य।

(ज) यदाज्ञापयति देवः। एष देवः, तदुपसर्पतु कनिष्ठमहाराजः अमात्यश्च।

वसन्त। (उपसृत्य) आर्य्ये! अभिवादये।

विक्रमा। वत्स! चिरं जीव।

भवा। जयति जयति देवः।

विक्रमा। वसन्त! कुमारान् शिक्षयितुं कीदृशो वः प्रयत्नः?।

वसन्त। आर्य्ये! किं नाम संवृत्तम्।

विक्रमा। पश्यैनं ज्येष्ठकुमारेण व्यापादितं विहङ्गम्।

वसन्त। इदं खलु बालचापल्यम्।

विक्रमा। अये! मध्यमयौवने वर्त्तमानस्यापि बालचापल्यम्।

भवा। देव! नमं हस्तशिक्षेयं कुमारस्य।

विक्रमा। अये! किमुच्यते।

करोति कश्चिन्नु हस्तशिक्षां
वियुज्यते कश्चन जीवनेन।
तदङ्गतेयं किल हस्तशिक्षा
क्व मूढजन्तोः सदसद्विवेकः॥८॥

वसन्त। आर्य्ये! कदाचिल्लक्ष्यभ्रंशोऽपि स्यात्।

गोविन्द। एवमेव सम्भाव्यते।

भवा। अस्त्येतत्।

विक्रमा। अस्तु नाम। तथापि—

शास्त्रश्च शास्त्रश्च हुताशनश्च
भवेद्दधानः खलु सावधानः।

न चेदवश्यं भविताऽचिराय
प्राणस्य धर्म्मस्य गृहस्य चाऽन्तः ॥८॥

गोविन्द। उदाहरणं तावदत्रैव।

विक्रमा। वत्स! वसन्त! कुमारस्य जन्मपत्रे पितृद्रोहवृत्तान्तमाकर्ण्य बलवदाशङ्कितं हृदयम्। इतश्च प्रतिपदं परिलक्ष्यत इव निष्ठुरता कुमारस्य।

वसन्त। आर्य्ये! मा मैवम्। प्रतापः खलु मे—

सरस्वान् गाम्भीर्य्ये, प्रतिनियतधैर्य्ये क्षितिधरः
जरासन्धो वार्य्ये, निपुणतमशौर्य्येऽर्जुनसमः।
सदौदार्य्ये रामो नृपतिनयकार्य्ये सुरगुरुः
गुणानां सन्दोहो जगति धृतदेहः स्थित इव ॥१०॥

गोविन्द। तदत्र न किञ्चिदाशङ्कनीयमिति वाक्यशेषः।

भवा। देव! ज्येष्ठकुमारः खल्वीदृश एव। किन्तु—

वसन्त। किन्तु किम्?।

भवा। दुर्जनस्य किल साहचर्य्यतः
सज्जनोऽपि ननु दुर्जनायते।
सङ्गतं स्फटिकरत्नमुल्मुके
निर्म्मलं मलिनमेव दृश्यते ॥११॥

श्रौनि। (दिशोऽवलोक्य)

स्फटिकादपि चन्द्रादपि च स्वच्छं सतां हृदयम्।
श्वनः पुच्छादपि कुटिलं धूर्त्तचित्तम्।
सुन्दरहृदयाः सुन्दराण्येव जगन्ति पश्यन्ति।

वसन्त। (विरक्तिमभिनीय) अथ भवता केन साहचर्य्य-मुपलक्षितं कुमारस्य ?।

भवा। देव! शङ्करो नाम कश्चन ब्राह्मणकुमारः समागत्य कुमारेण संसृष्टः।

गोविन्द। न केवलं संसृष्टः, सति सम्भवे मन्त्रिपदमपि ग्राहितः कुमारेण।

भवा। स पुनरशिष्टस्वभावतया स्वजननिर्वासित इति श्रूयते।

वसन्त। अप्येतत् सर्वं भवद्भिः श्रोत्रपरम्परया श्रुतम् ?।

भवा। देव! अथकिम्। साहचर्य्यन्तु साक्षात् कृतम्।

श्रीनि। (अन्तरालाभिमुखः)

समानपदेषु विद्वेषस्तुच्छहृदयानाम्।
बुद्धिमन्तः परचित्तमवगाहन्ते।
प्रभुशक्तिमता दिग्दर्शिना भवितव्यम्।

विक्रमा। (सनिर्वेदम्) वत्स! वसन्त! अत्र हि मे—

आशा नाशगता, तनुस्तनुतरा, केशास्तु काशोपमाः,
चित्तं वित्तसुखोपभोगविमुखम्, कर्णौ विशीर्णश्रुतिः।
नष्टा दृष्टिरुपात्तयष्टि गमनं लोकान्तरस्यान्तिके
तस्मादन्यकथा वृथैव, वसती वाराणसी श्रेयसी ॥१२॥

वसन्त। आर्य्य! जरेयं क्षमाविपर्य्ययेणाधिकमधिरूढा मामिव।

विक्रमा। भवतु। प्रमाणयति हि जनपदं कुमारस्य पितृद्रोहम्।

वसन्त। शान्तं पापम्।

उदेति नो तीक्ष्णकरः सुधाकरात्
न निष्पतत्यग्निकणः पयोधरात्।
तमो न वाविर्भवति प्रभाकरात्
न च प्रतापात् पितृवैरसम्भवः ॥१३॥

विक्रमा। अहेतुकोऽयं विहङ्गनिपात एव प्रकृति-परिचयः।

वसन्त। आर्य्ये! लोकतत्त्वान्तनिष्णात! किमेतावदेव वत्सस्याशिष्टस्वभावनिश्चयकारणम्?।

विक्रमा। अन्यच्च।

वसन्त। आर्य्ये! किमन्यत्?।

विक्रमा। अपूर्व्वं दुर्ज्जनसाहचर्य्यम्।

वसन्त। आर्य्ये! नैतावन्मात्रमपि दौर्ज्जन्यकारणं पर्य्याप्तं मन्ये, न वा स्वतोऽपि वत्सममशिष्टं वक्तुमुत्सहे। येन हि प्रतापः—

विनयः खलु मूर्त्तिमानिव प्रियवाक् सर्व्वजनस्य सर्व्वदा।
गुरुभक्तिपरायणः परः करुणानीरनिधिश्च दृश्यते ॥१४॥

विक्रमा। आस्तां तावत्। कुमाराणां शिक्षां प्रति कीदृशो वः प्रयत्नः।

वसन्त। जानात्येवार्य्या यथा कोटालिपाड़ावास्तव्यस्तत्र-

भवान् काश्यपः अविलम्बसरस्वतीपदप्रख्यात आर्य्य माधवचन्द्रः संस्कृतशिक्षायाम्, यवनभाषाशिक्षायान्तु वर्द्धमानदेशीयो महम्मद आलिर्नामोपयुक्त एव नियुक्तः शिक्षक आसीत्। परन्तु वत्सः प्रतापो वीरेन्द्रवर्म्माणं नाम वीरप्रवरमानीय अस्त्र-शिक्षायामपि परं प्रावाण्यमुपगत इति।

विक्रमा। न खल्वहं भाषादिशिक्षामधिकृत्य ब्रवीमि। को हि नाम निर्णीतिस्वाविचारशिक्षायामुपाय इति।

वसन्त। प्रतापस्त्वादित एव चरित्रवान्।

विक्रमा। अयं खलु स्नेहस्वभावः। तथा च—

पिधाय दोषं निदधाति तत्पदे
गुणाननन्तानपि वत्सलो जनः।
प्रियः किलान्धोऽपि भवन् भवत्यहो
प्रियान्तिके पद्मपलाशलोचनः॥१५॥

शोनि। दिङ्मूढो हि दिवाकरं दिगन्तरोदितं पश्यति।
आसन्नविपज्जनो गरलममृतं मन्यते।
भाग्यवतो हि विपदपि सम्पदः कारणं सम्पद्यते।

विक्रमा। वत्स! यद्ब्रवीमि—समधिगतशास्त्रः प्राप्तकालश्च मे कुमारः। तदिदानीं तस्य देशदर्शनाय प्रेषणमेव न्याय्यम्।

भवा। उत्तमः प्रस्तावः।

वसन्त। कुत इदम्?।

विक्रमा। यतश्च—

शिक्षा न सा भवति केवलपुस्तके या
या तु प्रदर्शितफला ननु सैव शिक्षा।
रोगं निहन्ति न सुखस्थितवैद्यविद्यः
नो वा रिपून् विजयते श्रुतयुद्धशास्त्रः ॥१६॥

वसन्त। तत् कतमस्मिन् प्रदेशे कुमारस्य प्रेषणमार्य्या युक्तरूपं मन्यते ?।

विक्रमा। वत्स! दिल्लीनगरी खलु सम्प्रति भारत-राजधानी। तेन हि तत्र—

नैपुण्यं पुण्यजन्यं विविधगुणगणं वित्तभावं प्रभावं
गाम्भीर्य्यं शौर्य्यवीर्य्यं सुख-नय-विनयं संश्रितानां श्रियश्च।
लोकस्यालं विलोक्य व्रजति हि सहसा खर्वतां सर्वगवः
खद्योतो द्योतमान-द्युमणि-रुचि किमु स्यादहङ्कारकारी ॥१७॥

विशेषतश्च—हृदयं खलु दर्पणो नृणां
प्रतिविम्बन्ति ततः स्वयं गुणाः।
यदि दुर्जनसङ्गजं मलं
न विकीर्णं प्रतिबन्धकं भवेत् ॥१८॥

वसन्त। अखण्डनीयः खल्वार्य्यादेशः। किन्त्वहमिदं विपरीतपथ्यं वसायि पश्यामि। येन हि तादृशनगर्य्याम्

प्रलोभनकरं परं विविधवस्तु सञ्जातकं
विलोक्य ननु संयतो भवितुमेव शक्नोति कः।
विकासि कुसुमावलीललितकानने को जनः
परिस्फुरितसौरभं परिहरन् विहर्त्तुं क्षमः ॥१९॥

विश्रमा । अये ! जगत्यामीदृशं कार्य्यमेव नास्ति, यदा-न्तरायो नाशङ्क्यते । किन्तु वत्सस्य मे विलासलेशोऽपि नोपलक्ष्यते, उपलक्ष्यते तु बलवती स्वाधीनताप्रीतिः । तेन च तत्र गतस्यैव सा समूलमेव विलयं यास्यति । कुतः—

शफरी स्वल्पनीरस्था गभीरामापगां गता ।
नोल्लासं पूर्व्ववद्वृत्ते प्रत्युताशु पलायते ॥२०॥

तदमात्य ! भवानन्द ! विलम्बेनालम्, क्रियतामाशु वत्सस्य दिग्विजयप्रस्थानाय सम्भारसंग्रहः ।

भवा । यथाज्ञापयति देवः । (इति निष्क्रान्तः)

श्रीनि । नियतिनियोग एव हि रागपदे विरागमासञ्जयति ।

निपुणमतयो हि सूत्रमुपेत्यैव विवरीतुमारभन्ते ।
समानवृत्तिकं खलु स्वपरेषु साधुहृदयम् ।

वसन्त । (आत्मगतम्) हन्त ! विधिनियोगो दुरतिक्रम एव जीवानाम् । येन हि—

उद्वेलितो नीरनिधिर्विनानिलं
तमः समेतश्च तमस्विनीं विना ।
विना च कार्य्यं विनयैकभूषणो
वत्स्ये किलार्य्यस्य मनो विशङ्कितम् ॥२१॥

इति निष्क्रान्ताः सर्व्वे ।

इति विहङ्गनिपातो नाम द्वितीयोऽङ्कः ॥०॥

तृतीयोऽङ्कः ।

——:००:——

ततः प्रविशति यमुनातरङ्गान्दोलितनौकायां गायन्तो धीवराः ।

अले ! आआसे वहइ वाआ, भासइ मेहा, दीसइ भङ्गओ ।

तूण्णं तूण्णं वाहेहि वाहेहि सअलाआ णाआआ ।

तोलेहि जालं चालेहि पालं

ण क्खिव कालं जाण्णा णाओ हो।

पाउ ण मच्छो लोदइ वच्छो

अन्दिए कच्छो दूले गिहाओ । (क)

तीरे प्रविश्य नीलमाधवः । अये धीवराः ! ।

धीवराः । (चलन्त्येव)

नील । अये धीवराः ! ।

धीवराः । (विलोक्य चलन्त्येव)

(क) अरे ! आकाशे वहति वातः, भासते मेघः, दृश्यते भङ्गः ।

तूर्णं तूर्णं वाहय वाहय, सकला नौकाः ।

तोलय जालं चालय पारं

न क्षिप कालं जीर्णा नौकाः ।

प्राप्तो न मत्स्यः रोदिति वत्सः

अस्ति कच्छः, दूरे गृहाः ।

नील। आः! कथं शृण्वन्तोऽपि गणयन्ति नाक्रन्दनम्?।

धीवराः। अले! का तुमं धीवला धीवला त्ति गज्जसि। (ख)

नील। अये! कृतं परिचयेन। त्वय्यं तां तीरमागन्तुम्।

धीवराः। हीमाणहे! लट्टिओ विअ आणवेदि। (ग)

नील। (सक्रोधम्) अये! के सन्ति प्रहरिणः, तूर्ण-मावध्यै तानानयत जाल्मान्।

धीवराः। (निरूप्य सभयम्) अम्मो! सअं ज्जेव पहलि पहू। ता मलिसेदु अज्जो। (तीरान्तिकमुपसृत्य) कधेहि अज्ज! अह्मेहिं किं कलणिज्जं। (घ)

नील। अपि विज्ञातमस्ति वः प्रसादपुरम्?।

धीव। पसादपुलं को ण जाणादि। (ङ)

नील। ततः काचिदबला युष्माभिरत्रानेया।

धीव। एत्थ किं ताए पिदुणो घलं?। (च)

नील। नहि नहि।

(ख) अरे! कस्त्वं धीवरा धीवरा इति गर्जसि?।

(ग) आश्चर्य्यम्, राष्ट्रीय इव आज्ञापयति।

(घ) अहो! स्वयमेव प्रहरिप्रभुः। तत् मर्षयतु आर्य्यः। कथय आर्य्य! अस्माभिः किं करणीयम्?।

(ङ) प्रसादपुरं को न जानाति?। (च) अत्र किं तस्याः पितुर्गृहम्?।

धीव । तदो को ण् एत्थ आणेदि । (छ)

नील । अपि श्रूयते ज्येष्ठराजकुमारस्य नूतनो मन्त्री आर्य्यशङ्करचक्रवर्त्ती नाम ?।

धीव । अज्ज ! सुणोअदि । (ज)

नील । तस्यैवेयं भार्य्या, स एव चानयति ।

धीव । एसो ज्जेव सो आअदो एसो ज्जेव अ कलत्तं आणेदि । ता कीस उणो एलिसं तुवलदि । (झ)

नील । सम्प्रति किल प्रसादपुरे सुमहानत्याचारो राजपुरुषाणाम् । तेन हि आर्य्यचक्रवर्त्ती स्वयमागत्य निष्पूतग्रहं मन्यमानो यशोरप्रदेशं दारानप्यानयति ।

प्रविश्य सशङ्कः पुरुषः । भद्र ! अपि विज्ञायते क्व इदानीमार्य्यः स चक्रवर्त्ती ?।

नील । कमत्रभवन्तमवगच्छामि ?।

पुरुषः । आर्य्यचक्रवर्त्तिन एव प्रतिवेशिनं धीरेन्द्रदत्तमवगच्छ ।

नील । अत्रभवतः किमागमनप्रयोजनम् ?।

धीरेन्द्र । राजपुरुषाः खल्विदानीमार्य्यस्यैव वास्तुन्यत्याचारार्थिनः, तेन च तं प्रत्यावर्त्तयितुमागतोऽस्मि ।

नील । तत् किमसुराणां स देशो लीलाभूमिः संवृत्तः ?।

(छ) ततः को नु अत्रानयति ?। (ज) आर्य्य ! श्रूयते ।

(झ) एष एव स आगतः, एष एव च कलत्रमानयति । तत् केन पुनरीदृशं त्वरते ?।

धीरेन्द्र। अथकिम्! सम्प्रति हि राजपुरुषाः—

अज्ञाय गृह्णन्ति करं समग्रं
उत्कोचमुत्पीड्य परं हरन्ति।
जिजीविषोर्धर्ममथोत्किरन्ति
धर्मार्थिनो घ्नन्ति तु जीवमेव ॥१॥

नील। अहह! शृण्वतोऽपि विदीर्य्यते हृदयम्।

धीरेन्द्र। अनुमीयतां तर्हि साक्षादनुभवतां कियती यातनेति। भवतु। ईदृशे वृत्तान्ते न मे युक्तरूपः समयक्षेपः। तदभिधीयतां क्वास्ते तत्रभवानार्य्य इति।

नील। क्वेदानीमास्त इति न विज्ञायते, विज्ञायते तु आर्य्यचक्रवर्त्तिना सममद्यैव ज्येष्ठः कुमारो दिल्लीमभियास्यन् प्रसादपुरमुपगम्य यास्यतीति।

धीरेन्द्र। इदमिदानीं कथम्?।

नील। लोकसंव्यवहारशिक्षार्थं ज्येष्ठो महाराज एव तं प्रेषयतीति।

धीरेन्द्र। इतो दिल्लीमभिगन्तुर्हि प्रसादपुरमुपगम्य गमने गरीयान् पन्थाः स्यात्।

नील। नूनमिममेव विप्लवमाशङ्क्य बन्धुसौहार्द्दादार्य्यचक्रवर्त्तिनः परिजनमितः सम्प्रेष्य गन्तव्यमित्यङ्गीकृतं पथो गौरवम्।

धीरेन्द्र। अपि मज्ञातमार्य्ये बन्धुसौहार्द्दं कुमारस्य?।

नील। न केवलं बन्धुसौहार्द्दम्, भविष्यदमात्यपदञ्च।

धारेन्द्र। (सहर्षम्) हन्त! धन्याः स्मः। कुतः—

सदुद्यमो दीनतमोऽपि शङ्करः
पदं पटुर्योग्यमुपेत्य सोऽधुना।
प्रतिक्रियाद्‌दुर्जनजातयातनां
तमो हि सूर्य्योऽप्यनुदित्य हन्ति न ॥२॥

इति निष्क्रान्तः।

नील। अये धीवराः! युष्माभिस्तत्र पञ्चवर्षं गन्तव्यम्। तदविलम्बेन सज्जीक्रियतां तरणिः।

धीव। तह। (अ)

इति निष्क्रान्ताः।

—•—

विष्कम्भकः।

—०—

(अ) तथा।

ततः प्रविशति शङ्करभवनद्वाराङ्गने सचिन्तः सूर्य्यकान्तगुहः, राजपुरुषः सुरेन्द्रनाथघोषालः, विभवतश्च यवनसैनिकाः।

सुरेन्द्र। सूर्य्यकान्त! ननु ब्रवीमि—नास्ति चिन्तावसरः। गुरुः खलु ते शङ्करो राजदण्डितानपसृतानुपलालयन् बलवदपराद्धः प्रच्छन्नः संवृत्तः। इतश्चामुना रोषकषायितचेतसा नवाबेन शङ्करपरिजनपुरस्कृतान् दण्डितजनानाहर्त्तुमद्य प्रेषितोऽस्मि। तत् समर्पय तावत् सद्भावेनैव शङ्करकलत्रसमेतमपराधिवर्गम्।

सूर्य्य। (आत्मगतम्) हन्त! किमिदमद्यापतितम्। अचिरादेवागमिष्यामीत्यभिधाय कयापि वेदनया विदूनहृदयस्तत्रभवान् मयि भवनभारं निधाय मासं यावदितो निर्गतः। तदन्वेषणाय च मया धीरेन्द्रदत्तप्रमुखाः परितः प्रहिताः। ते चाद्यापि नावर्त्तन्ते। येषाञ्च साहायकेन हितान् दिवसान् नानोपायेन प्रतिहता दुराचारा यवनानुचराः, तेऽपि रामेन्द्रशर्म्मादयो भवमिदानीमविप्लवं मन्यमानाः स्वे स्वे कर्म्मण्यभिनिविशमाना दरिद्रा देशान्तरं गताः। अन्तर्गृहस्थ दासीमात्रसहाया देवी कल्याणी पत्युः कल्याणं कामयमाना चतुर्द्दश्याः सायन्तनीं शिवार्च्चनामभिनिर्वर्त्तयति; तदिममनर्थपातमनभिसन्दधाना कथमपसरेत्। तत् किमिदानीमेकाकी मन्दभाग्यः करोमि। भवतु। उत्कोचदानप्रस्ताव एवाद्य प्रथमः कल्पः।

सुरेन्द्र । भोः ! किमेवं तूष्णीमवस्थीयते ? ।

सूर्य्य । आर्य्य ! परमसौभाग्यादप्रतिहतप्रभावो भवानद्य भवनमुपागतः, तत् कियती प्रणामदक्षिणा भविष्यतीति चिन्तयामि ।

सैनिकः । (जनान्तिकम्) हीमाणहे ! हीमाणहे ! ता कधेदु सहस्समुद्दा होदुत्ति । (ट)

सुरेन्द्र । (अपवार्य्य) मूर्ख ! केचिदमीभिरेव प्रतिहताः अपरे चोत्कोचमात्रेण प्रतिनिवृत्ताः । तदद्य शङ्करपरिजनो ध्रुवमेव समादेय इति नवावस्यादेशः । प्रेषितश्च तेन शतं सैनिकानाम् । तदद्यापि निवृत्तेः प्राणस्पन्दननिवृत्तिरेव परिणामः ।

सैनिकः । (जनान्तिकम्) ता जं पहुणो रोअदि । (ठ)

सुरेन्द्र । सूर्य्यकान्त ! तत् किं मामपि तुच्छहृदयं मन्यसे ? यदेवं प्रलोभयसि । अये ! जानामि महिमानमुत्कोचस्य ।

> भयञ्च पापञ्च भृशं ग्रहीतुः
> चिरादविश्वासमपि प्रदातुः ।
> प्रभोः क्रियानाशमथाप्यकीर्त्तिम्
> एकः किलोत्कोचरिपुः करोति ॥२॥

सूर्य्य । (आत्मगतम्) हन्त ! विफल एष पन्थाः । तदस्तु

(ट) आश्चर्य्यमाश्चर्य्यम् ! तत् कथयतु सहस्रमुद्रा भवत्विति ।

(ठ) तत्, यत् प्रभवे रोचते ।

तावदनुनय एव द्वितीयः कल्पः । (प्रकाशम्) आर्य्य ! अत्र हि तपस्विनो विशीर्णशालायां कुतो नाम दण्डितानामवस्थानम् ?।

सुरेन्द्र। अये ! पूर्व्वमासीदिदानीं नास्ति, स एव तपस्विनः शङ्करस्यापराधः, तत एव चायं कलत्रापहरणं दण्डः ।

सूर्य्य । आर्य्य ! प्रसीदतु, कृतोऽयमञ्जलिः, दीयतामियं भिक्षा ।

सुरेन्द्र । अये ! अस्थाने स्तुतिवादः प्रतारणां प्रद्योतयति । ततो ब्रवीमि दीयतामस्मै स्वहस्तन्यासीकृतं शङ्करकलत्रम् । अस्तु चानयोरसम्भावनीया चिरादनाथवङ्गनाथयोः प्रगाढ़ा प्रीतिः ।

सूर्य्य । (स्वगतम्) अहोवत ! किमिदानीं प्रतिविधेयम् । (विचिन्त्य) वाढ़म्, न खलु जीवता मया प्रदेया पिशाचहस्ते देवीप्रतिमा । तदयमस्तु तृतीयः कल्पः । (प्रकाशम्) आर्य्य ! को नामाहं वङ्गेशवासनां प्रतिरोद्धुम् । इदन्तु ब्रवीमि—

विप्रो भवन्नपि भवान् यवनार्थमद्य
विप्रस्य हि प्रसभमिच्छति सर्व्वनाशम् ।
देवः पिशाचपरमोऽजनि देववैरी
कुर्य्यात् कलिर्नु विषमं किमतः परं वा ॥४॥

सुरेन्द्र । (सरोषमिव) सूर्य्यकान्त ! विरमातिप्रसङ्गात् ।

सूर्य्य । आर्य्य ! क्रियतेऽयमञ्जलिः । ननु ब्राह्मणोऽसि । रक्ष ब्राह्मणजातिधर्म्मम् । भवादृशानामिव चेष्टया—

आर्य्या मिलन्तु सह शङ्करसन्निभार्य्यैः
दुःखं निहन्तु सुखमेत्य च मादृशानाम् ।

दीपान्तरैः प्रमिलिता ननु सन्तु दीपाः
भूरीप्रभूय रुचयस्तिमिरं किरन्तु ॥५॥

सुरेन्द्र। अये वर्व्वर! तत् किं मन्यसे तवोपदेशमेवासादयितुमिदमस्माकमुपस्थानम् ?।

सूर्य्य। आर्य्य! नायमुपदेशः, प्रार्थना खल्वियम्। मर्षयापराधं दासस्य। दारुणेनारुन्तुददुःखेनेदं ब्रवीमि। येन हि—

चित्तं यथा विप्रकृतं कुकर्म्म
दुनोति चाण्डालकृतं तथा न।
यथा प्रसूनस्य हि पूतिगन्धः
छिनत्ति नासां न तथा मलस्य ॥६॥

सुरेन्द्र। अरे अनात्मज्ञ! वर्धय! त्वं खलु नूनमपायसमयमहिम्ना स्वप्राणान् शङ्करदारांश्चोभयमेव दातुमिच्छसि। तदिदानीमप्युपदिशामि—

शङ्करस्य वनितां वितीर्य्य नः
रक्ष मान-धन-जीवनं निजम्।
औषधञ्च हितवाङ् मुमूर्षतः
दानमात्रमथवा स्खलत्यलम् ॥७॥

सूर्य्य। (स्वगतम्) हन्त! निष्फलः कदर्य्येषु सामवादः। तदस्तु तावत् सतीधर्म्म एव प्राणान्तः। (प्रकाशम्) अये! दीर्य्यते न कथमिदमसकृदभिधातुं ते रसनया। श्रूयतां तर्हि—

सतीकुलशिरोमणिं द्विजवरस्य पत्नीं द्विजो
भवन्नपि समीहसे यवनभोगसम्पत्तये ।
कदापि भविता न ते फलवतीयमाशालता
सवीयहविषः स्त्रुतिः पतति कुक्कुरास्ये किमु ? ॥८॥

अपि च । यः किलात्याचारजर्जरितानाश्वासयति निरीहान्, तस्मिन्नेव महात्मनि कलत्रापहरणं दण्ड इत्यपूर्वोऽयं दण्डविधानप्रकारः । तथा च—

क्व प्रसादोचितं कर्म्म क्व वायमद्भुतो दमः ।
निदाघे वीजयन् दण्डं नेत्रोत्तोलनमश्नुते ॥९॥

सुरेन्द्र । (सहासम्) अरे ! आविष्करोषि गर्वशपथम्, अवजानासि वङ्गेश्वरम्, पर्य्यालोचयसि राजकार्य्यम्, तत् किमपरः संवृत्तोऽसि सम्राट् ? ।

सूर्य्य । अये ! नाहमस्मि सम्राट् । यूयन्तु प्रत्यग्रराजसृष्टा विश्वविलक्षणा जन्तुविशेषाः संवृत्ता इति तत्त्वमधुनापि नावगच्छामि । तथा च—

एकावस्था भवति, न पुनर्भीतिलेशः पिशाचे ;
हिंस्रे जन्तौ भवति तु भयं केवलं न त्ववस्था ।
हिंसापूर्णैः कलुषिततमैर्नित्यरूक्षैः स्वभावैः
युष्मासु स्याद्युगपदुदिता भीतिसङ्गिन्यवस्था ॥१०॥

अपि च । रे जन्मभूमिकुसन्तान ! यूयं हि सम्प्रति—

वेशं देश-जल-स्थलं गिरिवनं नृणां स्वभावं गुणं
भाषां भङ्गिमथो विदेशियवना जानन्ति येन क्वचित् ।

तत् सर्व्वं प्रतिबोध्य तान्, धृतगलैस्तैरेव सञ्चालिताः
क्षुद्रस्वार्थविमोहिता व्यथयथ स्वां जन्मभूमिं खलाः ॥११॥

सुरेन्द्र। आः! पाप! दुरात्मन्! कायस्थापसद! अस्मानेवाधिक्षिपसि। तत्त्वमद्यैव भावी जन्मभूमेः सुसन्तानः। येन हि—

छिन्ने मूर्द्धनि रक्तेन भुवं रक्तीकरिष्यसि।
भवत्येव सुसन्तानः प्रसूतिं भूषयन् सुतः ॥१२॥

सूर्य्य। अये! समरेण मरणमपि श्रेयः, न पुनः पिशाचहस्ते देवीप्रतिमाविसर्ज्जनम्।

सुरेन्द्र। आः! सम्भावयसि किं समरेण त्वमेवास्याः परित्राणहेतुः। अरे।

हरति यदननाथः कस्यचित् कामिनीञ्चेत्
प्रभवति किमु रोद्धुं कोऽपि कायस्थ एकः।
स्पृशति किरणजालैः पद्मिनीञ्चेद्विवस्वान्
न खलु शिशिरविन्दुः स्वाम्निषेद्धुं समर्थः ॥१३॥

सूर्य्य। अरे! को नामाहमस्याः परित्राणे?। पर्य्याप्तस्तु शङ्करस्यैव प्रतापः।

सुरेन्द्र। आः! किमुच्यते—शङ्करप्रताप एव वङ्गेश-वासनाप्रतिरोधपर्य्याप्तः। अरे वर्व्वर! अनात्मज्ञ! तदा तु—

खद्योतस्य क्षणद्योतो ध्वान्तराशिं निरस्यतु।
जाज्वल्यमानं दावाग्निं हिमविन्दुश्च लुम्पतु ॥१४॥

सूर्य्य। अरे यवनपदलेहननिहृतधर्म्मन्! कर्म्मचण्डाल!

अविदितगुरुशक्तिर्ब्रह्मतेजःप्रणुन्नः
समयमयमियन्तं यावदत्रापितात्मा ।
वनगत इव वह्नेर्विन्दुरस्माय वृत्तात्
ध्रुवमिह निदहेद्वः शङ्करस्य प्रतापः ॥१५॥

सुरेन्द्र । अरे कायस्थापसद ! यत् पुराणेषु श्रूयते क्षुद्रस्य पक्षिणः सागरसेचनोद्यम इति, तदिदं प्रत्यक्षमीक्ष्यते नाम । तत् किमन्यत्—

यया क्षरन्नतिपरुषाक्षरं क्षणात्
विकृष्य तां कटुरसनां विभिन्दता ।
शुना शनैः शितदशनैस्तिलीकृतः
व्रज क्षयं क्षपितविलक्षणीक्षणः ॥१६॥

सूर्य्य । अरे रे ब्राह्मणकुलकलङ्क ! पापिष्ठ ! निष्ठुर-हृदय ! तिष्ठ तावत्—

प्रकाण्डभुजमण्डलव्ययितचण्डकोदण्डतः
ज्वलज्ज्वलनवज्रवज्जवगतैर्निशातैः शरैः ।
ध्वनन्ननिशमुद्धतं विजयवद्धगर्व्वोऽधुना
द्विजोऽपि पतितो यतः क्षितितले ततः पात्यसे ॥१७॥

सुरेन्द्र । (सैनिकान् प्रति) अये ! किं दृश्यते, क्षुद्रनलिके-नाहत्य संयम्यतामयं दुरात्मा ।

पापः पश्यतु चित्रमृत्युपदवीं वङ्गेशसंशासनात्

झटिति प्रविश्य धीरेन्द्रदत्तः । (शूलमुद्यम्य)

त्वञ्चापि प्रतिपश्य घोरनरकं प्रेतेश्वरादेशनात् ।

द्रुतं प्रविश्य मुकुन्दघोषः । (तरवारिमुत्तोल्य)

प्राक् पश्य स्वशिरःक्षितौ विलुठितं श्रीशङ्कराज्ञापनात्
सुरेन्द्र । (शस्त्रमाकृष्य)
यूयं पश्यत नश्यदात्मविभवाः कारां चराविशनात् ॥१८॥
इति विकटं परिक्रम्य निष्क्रान्ताः सर्व्वे ।

तृतीयोऽङ्कः ।

तृतीयाङ्के गर्भाङ्कः ।

ससम्भ्रमं प्रविश्य सूत्रधारः । (कलकलमाकर्ण्य)
मातः शङ्करवल्लभे ! त्वमसि यन्नित्यं सतीनां गतिः
मुग्धां शङ्करवल्लभामतिसतीं श्रीशङ्करध्यायिनीम् ।
कल्याणीं ननु रक्ष रक्ष चपलं कल्याणि ! बालाबलां
स्वर्गस्येव विधर्म्मिभिर्दितिसुतैरापद्यमानां श्रियम् ॥१९॥

(नेपथ्याभिमुखमवलोक्य सविषादम्) हन्त ! आहतः सूर्य्यकान्तः, संयतो मुकुन्दघोषः, मूर्च्छितश्च धीरेन्द्रदत्तः । (पुनर्नेपथ्ये कलकलः) हा धिक् हा धिक् ! भग्नं कपाटम्, प्रविशति च निर्बाधं यवनबलस्रोतः । (नेपथ्ये)

ववम् हर ! ववम् ववम् हर ! महेश ! वम् वम् वम् ।
पुनर्नेपथ्ये । वमानेतुं दिशसि किं कति तेन हनिष्यसि ।
जयेच्छा चेद्बलवती कटाक्षं क्षिप सुन्दरि ! ॥२०॥

सूत्र । (अवलोक्य) एष हि सुरेन्द्रहतकः-

बाल्याद्दुरात्मा यवनानुसेवी
निशम्य 'बम् बम्' मुखवाद्यमन्त्रः ।
'बम्' नाम विस्फोरकवस्तु मत्वा
केलिप्रलापेन दुनोति देवीम् ॥२१॥

धिक् पापिष्ठम् । वारिधराः ! किमशनिशून्याः संवृत्ताः ? ।

इति निष्क्रान्तः ।

—o—

प्रस्तावना ।

—o—

ततः प्रविशति पञ्चषसैनिकैरनुगम्यमानः सुरेन्द्रः
वामाख्यया परिचारिकयान्वास्यमाना
समासन्निवाद्यं ना च गायन्ती कल्याणी ।

कलकलकारि जाह्नवीवारि वहति नदति जटाजाले ।
हिमगिरिकन्या भुवनशरण्या मिलति वपुषि विशाले ।
अतिमनोहरो बालनिशाकरो विकसति विलसति भाले ।
नाशय विपदं देहि हृदि पदं शङ्कर ! मम चिरकाले ।

कल्याणी । (गानं समाप्य 'बबम्' इत्यादिना पुनर्मुखं वादयति) ।

सुरेन्द्र । बमानेतुमित्यादि पुनः पठति ।

वामा। (विलोक्योत्थाय सत्रासम्) सामिणि! सामिणि! णं उवट्ठिदा हदासा। (ड)

कल्याणी। (सोद्वेगम्) सूर्य्यकान्तः क्व?।

वामा। गज्जिअ विरदो। (ढ)

कल्याणी। (सोत्कम्पम्) हन्त! नैकोऽपि परित्राता?। (इति मूर्च्छति)

सुरेन्द्र। नवीने! समाश्वसिहि। स्वयं नवाव एव ते परित्राता।

वामा। सामिणि! समस्सस धम्मं ज्जेव परित्तादारं आक्कन्द। (ण)

कल्याणी। (कथञ्चिदाश्वस्योत्थाय साकूतम्) धर्म्मः अधर्म्म इति समाजप्रयोजनम्, देवो दानव इति लोकस्वभावविभागः, ईश्वर ईश्वर इति दुर्ब्बलानामाश्वासः, दैवं दैवमिति विपन्नानां सान्त्वनाप्रयोगः, वेदः स्मृतिरिति बालानामलोकप्रलापः। (साटोपम्) पृथिवि! पृथिवि! व्योमतामापद्यस्व, सागर! सागर! प्लावयस्व धरातलम्, वैश्वानर! वैश्वानर! ग्रसस्व चराचरम्, प्रभञ्जन! प्रभञ्जन! कल्पयस्व तिलशो ब्रह्माण्डम्,

---

(ड) स्वामिनि! स्वामिनि! ननूपस्थिता हताशाः।

(ढ) गर्ज्जित्वा विरतः।

(ण) स्वामिनि! समाश्वसिहि, धर्म्ममेव परित्रातारम् आक्रन्द।

आकाश! आकाश! पाषाणात्मना निपतन् मर्द्दयस्व स्थावर-जङ्गमम्। जनार्द्दन! चक्रपाणि! क्व नाम ते सुदर्शनः?। भीम! शूलपाणि! अपि शूलविहीनोऽसि? देवराज! वज्रपाणि! ननु स्वस्थमस्ति ते वज्रम्? मातर्दानवमर्द्दिनि! किं विस्मृतासि खरं करवालम्? हा सतीकुलदेवते! हैमवति! (इति मूर्च्छति)

सुरेन्द्र। (वामां प्रति) अये! किमुपेक्षसे समाश्वासय भद्राम्।

वामा। (स्वगतम्) तुम्मे वि जमो समासासाविदु। (प्रकाशम्) सामिणि! समस्सस समस्सस। (इति पटान्तेन वीजयति) (त)

कल्याणी। (समाश्वस्य) किमयं लोकालयः? नहि नहि, परिचरन्ति हि पिशाचाः। किमेष घोरनरकः? न खलु न खलु, नाविर्भवन्ति हि कृतान्तकिङ्कराः पापान् पीड़यितुम्। तत् किमिदं श्मशानम्? एवमपि न, सदाशिव एव नाव-तिष्ठते। तर्हि किं महारण्यम्? नैवमपि नैवमपि, न खल्वाक्रामन्ति श्वापदाः क्षुद्रान्।

सुरेन्द्र। सुन्दरि!।

कल्याणी। तूष्णीम्भव पिशाच!।

सुरेन्द्र। विधेहि कटाक्षपातम्।

(त) युष्मानपि यमः समाश्वासयतु। स्वामिनि! समाश्वसिहि समाश्वसिहि।

कल्याणी। मूर्द्धन्यस्तु ते वज्रपात:।

सुरेन्द्र। मर्षयापराधम्।

कल्याणी। इयं मर्षयामि। (इति छुरिकामाकर्षति)

सुरेन्द्र। समाश्वसिहि शोभने! वदसि किं भवाशु स्थिरा
जहीहि निधनाश्रयं चल नवावहर्म्यान्तरम्।

कल्याणी। (छुरिकामुद्यम्य) आ: पापिष्ठ,! यवनापसद!।

सुरेन्द्र। युधं यदि समीहसे, प्रिय-नवाव-वक्ष:स्थले
निपत्य मणिमालया स्वसमया समं युध्यताम् ॥२२॥

कल्याणी। आ: पाप! दुरात्मन्! दूषयन्नपि पूजास्थान-मद्यापि जीवसि? जल्पसि चाजस्रम्? तदिदानीमेव

शिरो नमतु वासुके:, पततु भूतलं प्रस्खलत्
क्षितौ लुठतु भास्कर:, किरतु सेन्दुतारा नभ:।
जगद्दहतु सर्व्वशो ज्वलितकोटिकालानल:
विलोकयतु विक्रमं भुवनमार्य्यसत्या: क्षणात् ॥२३॥

सुरेन्द्र। (सकेलिहासम्) सुन्दरि! सुन्दरि! तव तेज: प्रदहेदितरान्, विक्रमश्च परिभवेदपरानित्यत्र क: सन्देह:। येन हि—

त्वदुर्दितमदनाग्निक्षिप्तपाषाणमुग्र:
दहति यवननाथस्याप्यविश्रान्तमेव।
तव ललितगुणानां विक्रमस्य श्रुतानां
गिरिमिव चिरधीरं द्रागधीरं चकार ॥२४॥

कल्याणी। आ: कुक्कुर! अस्पृश्य! तथापि न निवर्त्तसे?

सुरेन्द्र। (सरोषम्) धिक् कालहरणम्। (पार्श्वचरं प्रति) अये! वाहिकानाज्ञापय शिविकामुपस्थापयितुम्।

पार्श्वचरः। णं एत्थ उवत्थाविदा ज्जेव सिविआ। (थ)

वामा। (अञ्जलिं बद्धा) भद्द! रक्ख रक्ख मज्जादं बह्मणस्स। (इति पादयोः पतति) (द)

सुरेन्द्र। अपसर गर्भदासि!। (हस्तौ प्रसार्य्य कल्याणीं प्रति) अये! आयाहि नवावालयम्।

झटिति प्रविश्य शङ्करप्रतापौ। (नालीकाभ्यां गुलिके निक्षिप्य) त्वमपि याहि यमालयम्।

सुरेन्द्र। (पतति)

अपरे। (पलायन्ते)

कल्याणी। (छुरिकामुद्यम्य धावति)

प्रताप। (अपसरन्) देवि! देवि! सेवकः सम्प्राप्तो न हन्तव्यो न हन्तव्यः।

शङ्कर। (कल्याणीं करे गृहीत्वा) उद्भ्रान्ते! विरम विरम, परित्राता तवायं कुमारः प्राप्तः।

वामा। सामिणि! सामिणि! दिट्ठिआ सामिणा अब्भुववण्णासि, ता पइदित्था होहि। (ध)

(थ) नन्वत्रोपस्थापितैव शिविका।

(द) भद्र! रक्ष रक्ष मर्य्यादां ब्राह्मणस्य।

(ध) स्वामिनि! स्वामिनि! दिष्ट्या स्वामिना अभ्युपपन्नासि।

कलप्राणी । (विलोक्य सविस्मयविषादम्) ननु कोऽयम् ? आर्य्यपुत्रः प्राप्तः । हा आर्य्य पुत्र ! । (इति मूर्च्छति)

वामा । सामिणि ! समस्सस, समस्सस । णं सामिणा ज्जेव अब्भुववरूणासि । (इति वीजयति) (न)

कलप्राणी क्रमेण संज्ञां लभते ।

प्रताप । वयस्य ! एतावतापि दैवमनुकूलमेव तर्कयामि । येन हि—

सुराप्रवाहो न सुधामदूषयत्
लेखां विधेर्नापि विधुन्तुदोऽग्रसत् ।

शङ्कर । समुद्यति प्रत्युषसि प्रभाकरे
निरोद्धुमर्हन्ति तमांसि किं द्रुतम् ॥२५॥

भवतु । कुमार ! प्रायेण विलम्बिनमवलम्बते विपत्-पातः, तदोद्दूर्मिवेनामुपाददानाः क्षिप्रममुना पक्षद्वारेणापक्रम्य ध्रुवमेतावता समयेन कुल्याघट्टोपलग्नां यशोरगामिनीं तरणिं प्रापयामः ।

प्रताप । नन्वियतैव समयेन स्वपक्षमन्विष्य तत्र वीरेन्द्र-वर्म्मण उपस्थितिं सम्भावयामि ? ।

शङ्कर । न खलु क्वापि मन्दायन्ते निसर्गनिपुणाः ।

(न) स्वामिनि ! समाश्वसिहि स्वमाश्वसिहि । ननु स्वामिनैव अभ्युपपन्नासि ।

प्रताप। तत्कर्त्तव्यमिदानीं कापुरुषोचितं कर्म्म। (अञ्जलिं बद्ध्वा) मातर्वङ्गवसुन्धरे !

इदं रहसि रोपितं तनुतरं हि वीजं नवं
सुसन्तति-महोद्यम-प्रचुर-वारि-संसेचनात्।
नवाव-विजयाङ्कुरं पिशुन-नाश-काण्डोदयं
स्वधर्म्म-कुसुमं सतां शुभफलं प्रसौतु क्रमात् ॥२६॥

इति शङ्करपरिचारिकाभ्यां धृतहस्तया कल्याण्या सह पश्चद्वारेण ससम्भ्रमं निष्क्रान्तः।

—०—

इति कल्याणीपरित्राणं नाम तृतीयोऽङ्कः।

—०—

चतुर्थोऽङ्कः ।

——:००:——

ततः प्रविशति यशोरोद्यानवहिर्वेदिकायामासीनः सचिन्तो धीरेन्द्रदत्तः, उद्यानतो निष्क्रामन्ती पुष्पकरण्डिकाहस्ता वामा च ।

धीरेन्द्र । (विलोक्य) वामे ! अपि कुशलिन्यार्य्या कल्याणी ? ।

वामा । अध इं । (क)

धीरेन्द्र । अथार्य्यायामन्तःपुरिकाणां कीदृशो व्यवहारः ? ।

वामा । ता सुठ्ठु सव्वं । कणिट्ठमहिसी बहूए विअ वच्छल्लं करेदि, बहू पव्भाअ वहिणीसिणेहं दंसेदि । (ख)

धीरेन्द्र । (सानन्दम्) तदा खल्वम्बा मे कान्तारमतीत्यो द्यानमध्यास्ते ।

वामा । तह ज्जेव । (ग)

धीरेन्द्र । कस्यैतानि नीयन्ते कुसुमानि ? ।

वामा । अज्ज चउद्दसीत्ति पदोससिवाच्चणाणिमित्तं सामिणीए ज्जेव । (घ)

(क) अथकिम् । (ख) तत् सुष्ठु सर्व्वम् । कनिष्ठमहिषी बध्वा इव वात्सल्यं करोति, वधूः पश्चा च भगिनीस्नेहं दर्शयति ।

(ग) तथैव ।

(घ) अद्य चतुर्द्दशीति प्रदोषशिवार्च्चनानिमित्तं स्वामिन्या एव ।

धीरेन्द्र । अद्यापि सा प्रदोषशिवार्च्चना ! ।

वामा । धीरेन्द ! अज्ज चउवच्छरं गदं तहवि पुच्छिदुं विसुमरिदह्मि । ता कधेहि—तहिं दिवसे तुमं मुउन्दो अ झत्ति ज्जेव कुदो आअदो ? । (ङ)

धीरेन्द्र । अये ! जानास्येव यथा यवनोपप्लवाग्निर्विग्न हृदये किलार्य्ये भवनान्निर्गत्य विलम्बमाने तदन्वेषणाय सतीर्थेन बुद्धिविक्रमज्यायसा सूर्य्यकान्तेन परितो वयं प्रहिता इति ।

वामा । णं जाणामि । (च)

धीरेन्द्र । अहन्तु कुतोऽपि श्रुतवृत्तान्त इदमेव यशोर-मुपागत्य साक्षात्कृत्य च दिल्लीगामिना कुमारसार्द्धेनार्य्येण स्वपोते सह नीयमानः प्रसादपुरात् क्रोशमात्रान्तरे कुमारेण सममात्मोपस्थितिं प्रागेव देवीमभिधातुं तीरेऽवतारितः ।

वामा । जुज्जदि । (छ)

धीरेन्द्र । अवतीर्य्य च कियन्तं पन्थानमतीत्यैव यदृच्छया-गतेन प्रियसुहृदा मुकुन्देन सहोपसर्पन् नातिदूरादार्य्यभवन इव कलकलमाकर्ण्य समधिकं त्वरमाणो भवनद्वारमागत्यैव सूर्य्यकान्तमाक्रमितुमुद्यतां यवनसेनामद्राक्षम् ।

(ङ) धीरेन्द्र ! अद्य चतुर्वत्सरं गतम्, तथापि प्रष्टुं विस्मृतास्मि । तत् कथय तस्मिन् दिवसे त्वं मुकुन्दश्च झटित्येव कुतः आगतः ।

(च) ननु जानामि । (छ) युज्यते ।

वामा । (सत्रासम्) अह्मो अतक्किदो ज्जेव अणत्थपादो । (ज)

धीरेन्द्र । ततश्चानुमितवृत्तान्त एव सूर्य्यकान्तसाहायकं सम्पादयन्नलक्षितलगुड़पातेन विमूर्च्छितः प्रबुध्यमान एव यवनवेशिना वीरेन्द्रवर्म्मणाभिहितोऽस्मि ।

वामा । किं दाव ? । (झ)

धीरेन्द्र । "आर्य्यशङ्करेण कुमारेण च पृष्ठतः समाक्रम्यमाणं सर्व्वमेव परावृत्तं यवनबलम् । तदस्मिन्नेवान्तरे प्रगाढ़ान्धकारे स्वविदितवर्त्मनैव त्वरितमुपसर्पत कुल्याघट्ट"-मिति । अथ तु—

मुक्तं मुकुन्दमवलम्ब्य स सूर्य्यकान्तः
वीरेन्द्रमन्धतमसेऽपसरन्नहञ्च ।
कुल्यातटस्थतरणिं त्वरयाधिरूढ़ौ
देशोऽपि हन्त ! विधिना विहितो विदेशः ॥१॥

वामा । अथ सुणिदं—'तहिं ज्जेव अन्तरे पिट्टदो' अअस्सं नालीअणिणादं सुणिअ परावित्ते जवणबले अज्जो कुमारो अ जीसोज्जाणमज्झदो आअदूअ पक्खदुआरेण पविट्ठो त्ति । (ञ)

धीरेन्द्र । (सोत्कण्ठम्) ततः ? ।

वामा । तदो अ वावादिदे जवणबलप्पहाणे सुरेन्द्दहदए

(ज) अहो ! अतर्कित एवानर्थपातः ।

(झ) किं तावत् ? (ञ) अथ श्रुतम्—तस्मिन्नेवान्तरे अजस्रं नालीकनिनादं श्रुत्वा परावृत्ते यवनबले, आर्य्यः कुमारश्च जीर्णोद्यानमध्यत आगत्य पक्षद्वारेण प्रविष्ट इति ।

झत्ति ज्जेव लउड़मेत्तपाणिसुं ओसरिदेसुं पविट्ठेसेसुं सामिणीं मं अ गेण्हिअ तेण ज्जेव पक्खदुआरेण णिग्गदूअ आअदो तुह्मेहिं जाणिदो तरिं आरूढ़ो। (ट)

धीरेन्द्र। परन्तु जानास्येव यथा कुमारस्यादेशमात्रमेव—

जलेऽनुकूले पवने च पृष्ठगे
तड़िज्जवेनैव तरिस्तरन्त्यसौ।
कुमारपोतस्य गलेऽवलग्नतां
गतैव गङ्गाम्बुतरङ्गनर्त्तिनः ॥२॥

वामा। जामि, सामिणीए कुसुमाइं अप्पेमि। (ठ)

इति निष्क्रान्तौ।

विष्कम्भकः।

—०—

अथ प्रविशति दिल्लीसभायां मन्त्रिपारिषद्समेतो भारतसम्राट् आकवरः।

आक। (स्वगतम्) अहो! स्थाने खल्ववस्थाभेदेन रूपभेदः प्रभुमात्रस्य। तथाहि—

(ट) ततश्च व्यापादिते यवनबलप्रधाने सुरेन्द्रहतके, झटित्येव लगुड़मात्रपाणिषु अपसृतेषु प्रविष्टशेसेषु, स्वामिनीं माञ्च गृहीत्वा तेनैव पक्षद्वारेण निर्गत्य आगतः युष्माभिर्ज्ञातः तरिमारूढ़ः।

(ठ) यामि, स्वामिन्याः कुसुमान्यर्पयामि।

कस्मिंश्चित् सरलः क्वचिच्च कुटिलः कुत्रापि वा निश्चलः
कञ्चिन्मूर्द्धि दधाति कञ्चन पुनर्नीचं नयत्यन्तरे।
कुर्व्वन् पूरणभञ्जने सफलयन् देशं गभीरः प्रभुः
नद्याः पूर इवानिवारितरयो गम्यां दिशं धावति ॥१॥

अपि च।

विशङ्कमानोऽप्यविशङ्कितत्वं भीतः पुनः सन्नपि निर्भयत्वम्।
अन्तर्बहिर्भिन्नमिति स्वभावं महीपतिर्दुर्जनवद्बिभर्त्ति ॥२॥

इत्थञ्च, राजलक्ष्मीमिव महतीमशान्तिमपि प्रेयसीमिव मन्यते राजलोकः। तेन हि शान्तिमन्विष्यतो राज्यलिप्सा विडम्बनैव ; तस्य तु सन्न्यास एव श्रेयान्। येन हि—

चरामि कण्टकारण्ये कण्टकं न स्पृशामि च।
ईदृशी कामना तावदुन्मत्तस्यैव जायते ॥३॥

विशेषतस्तु भारतशासनम् अतिगहनं नितरामशान्तिनिदानञ्च। यतः—

विद्याबुद्धिसमृद्धिसिद्धिविषयेष्वाद्यो जगच्छिक्षकः
देशोऽसावतिविस्तृतो बहुजनः शूरोऽपि दक्षोऽपि च।
भाषाधर्म्मपरिच्छदा बहुविधा भिन्नाश्च धीवृत्तयः
मन्ये भारतमेकमेव तदिदं पृथ्वीं किलान्यामहम् ॥४॥

तत्र चायमेवाविप्रतिपन्नो निर्णयः, यत् प्रजानां पक्षपात एव राजानं रक्षतीति। तथा च

अनुग्रहाद्विन्दति निग्रहाच्च प्रभुः प्रजानां किल पक्षपातम्।
सर्व्वत्र पूर्व्वः परमोपकारो परो विपत्तौ विपरीत एव ॥५॥

अतएव हि हिन्दुस्थाने हिन्दुषु मे वैवाहिकसम्बन्ध-निर्ब्बन्धः । फलितश्चायं प्रायेण, विशेषतस्तु मानसिंहे । येन हि—प्रथितश्चैतत् लोकेषु मानसिंहो भारतेश्वरस्य दक्षिण-हस्त इति । तथापि तु विजातीयतया तेजस्वितया महावीरतया अनुरक्तसेनानायकतया च तत्र बलवदेव सन्दिहानं मे मनः, यदि कदाचिद्वैरायत इति । अतएव हि यदैव प्रतापसिंह-स्यातिथ्यग्रहणायोद्युङ्क्ते, जानता च मया तदैवाय-मिङ्गितेनानुमोदितः । तत्र च यदि नाम प्रतापसिंहः सहभोजन-मस्याङ्गीकुर्य्यात्, हन्त ! सिद्धं हि मे निर्विवादमेव मिवारे-ष्वाधिपत्यम् । इतरथा तु—

मानोऽपमानकर्त्तारं प्रतापं नहि मर्षयेत् ।
उद्धरिष्याम्यवश्यं तत् कण्टकेनैव कण्टकम् ॥६॥

प्रविश्य दौवारिकः । जेदु जेदु देओ । एदं पत्तअं । (क)

आक । (गृहीत्वा वाचयति) स्वस्ति राजराजेश्वरं भारते-श्वरमवनितलावनतेन शिरसा प्रणिपत्य जीवन्मृतो मानसिंहो विज्ञापयति । जानात्येव देवो यथा प्रतापसिंहेन सह सन्धि-बन्धाय मिवारान् प्रति गत इति । तत्र च प्रविशन्नेव कुक्कुर इवास्पृश्यतया तस्कर इव घृणया, चण्डाल इवावज्ञया, जिघांसुरिव हिंसया दृष्टोऽस्मि पौरजानपदैः । अथ तु कश्चिदपि परिचिन्वानोऽपि नालपति, सम्बोधितोऽपि नोत्तरं ददाति, सोत्प्रासमीक्षितोऽपि च सम्मुखं नेक्षते । तथापि तु प्रार्थित-दर्शनोऽपि प्रतापसिंहः शिरःपीड़ापदेशेनात्मजममरमेव

(क) जयतु जयतु देवः । एतत् पत्रम् ।

प्राहिणोत् । सोऽपि च आतिथेयीग्रहणाय कृताग्रहः, मयि च भोजनासनमध्यासीने प्रचुरतरच्छद्मना केवलमेव व्यलम्बत, अथ तु द्विवाण्यवानि अन्नमयदेवसम्मानायोष्णीषे निधाय प्रस्थान-प्रवृत्ते मयि समक्षमेव मानस्य जीवनेनेव मानेन सह पदाङ्कान् प्रोञ्छयामास गोमयेन, ततश्चैकलिङ्गायतनमुपेत्य तिष्ठमानोऽस्मि। तेन चेदं विदांकरोतु तत्रभवान्—

यद्यमुष्य प्रतीकारं न कुर्य्यां वीर्य्यवानपि ।
तदाम्बरं न यास्यामि यास्याम्यम्बरतां ध्रुवम् ॥९॥

इति श्रुत्वा देवः प्रमाणम् ।

(सानन्दोच्छ्वासम्) हन्त ! सिद्धं नः समीहितम् ।

(इति साश्रुसमासनं परिगृह्य प्रकाशम्) अये ! प्रस्तूयता-मद्यतनं कार्य्यम् ।

उत्थाय टोडरमल्लः । जयति जयति देवः । देव ! वङ्गेषु यशोरराज्यमिदानीं राजान्तरमन्विष्यति ।

आक । कस्तत्र राजासीत् ? ।

टोडर । अस्त्येव तत्र राजा विक्रमादित्यो नाम ।

आक । तत् किमयमपुत्रः सन्न्यासधर्म्मा संवृत्तः ? ।

टोडर । सुयोग्यपुत्रो गृहस्थश्चायम् ।

आक । तत् किं ब्रवीषि यशोरराज्यं राजान्तर-मन्विष्यतीति ? ।

टोडर । देव ! अद्य त्रीनब्दान् यावत् पुनः पुनर्विज्ञापितो-

ऽपि न ज्ञापयति स्वामवस्थाम्, समर्पयति न करं न कराङ्कितं पत्रं न किञ्चिद्वाचिकञ्च ।

आक । तत् किमुदास्त एव वङ्गीयनवावः ? ।

टोडर । नोदास्ते ; जिज्ञासितो विज्ञापयति स्वयमेवासौ करं प्रेषयतोति ।

आक । हन्त ! दाता च ददाति, ग्रहीता चोररीकरोति, राजकोषे च नायातीत्यहो विचित्रम् । तत् किं विद्रोहा-योदयुङ्क्ते ? ।

टोडर । देव ! वाङ्मात्रवीरेषु वङ्गेषु नाशङ्कनीयो विद्रोहोद्योगः । येन हि—

अन्तःसारविहीनो हि वक्ता प्रायेण दृश्यते ।
शून्याम्बरतयैवायं पटहः पटशब्दनः ॥८॥

आक । मा मैवम् ।

वाग्मी च कर्मकुशलश्च महासुधीश्च
शूरश्च शास्त्रनिपुणश्च सुलेखकश्च ।
किन्त्वेकताविरहितो विफलात्मशक्तिः
वह्निस्फुलिङ्ग इव बङ्गजनो न गण्यः ॥९॥

तत् परिज्ञायतां सद्य एव सत्यो वृत्तान्तः ।

मन्त्री । देव ! अत्रैवास्ति यशोरराजकुमारः प्रतापो नाम । तत एव परिज्ञेयस्तावदिदानीन्तनः परमार्थः ।

आक । एवं क्रियताम् ।

मन्त्री । कः कोऽत्र दौवारिकाणाम् ? ! यशोरराजकुमारः प्रतापस्तावदाहूयताम् ।

दौवा । तह । (इति निष्क्रम्य प्रतापशङ्कराभ्यां सह पुनः प्रविश्य) एत्थ उपसप्पध अज्जा । (ख)

प्रताप । (महार्घं रत्नमेकं सावनति समुपहृत्य साञ्जलि-बन्धम्) देव !

कृपया कृपणादस्मात् सिन्धुस्तुहिनविन्दुवत् ।
गृहाणाकर ! रत्नानां रत्नाकारमिदं कियत् ॥१०॥

आक । (सादरं परिगृह्य स्वगतम्) अये ! सौम्यदर्शनः सत्त्वपिशुनाकारश्च कुमारः । (प्रकाशम्) श्रुतमेवास्माभिरायुष्मतः प्रतापेत्यभिधानम् । तदिदमन्वर्थमपि भूयादित्याशास्महे ।

प्रताप । देव ! पापास्पदे कौणपे पुण्यजनाभिधानस्येव परिदुर्बले वङ्गसन्ताने निरपेक्षकृतप्रतापसङ्केतस्य सार्थकता-सम्भावना आकाशकुसुमिकेव । तथापि तु—

तव प्रसादादथवोक्तिमात्रात्
अन्वर्थता स्यान्ननु नाम नाम्नः ।
"दिल्लीश्वरो वा जगदीश्वरो वा"
जगन्ति येनेति विदन्ति वादम् ॥११॥

(इति वादसाहस्य आचरणात् समस्तमङ्गमुद्दीव्यते)

आक । (सोत्प्रासम्) आयुष्मन् ! तत् किं नाम दृष्ट-मतिमात्रदृष्टिपातेन ? ।

प्रताप । देव ! प्रभूतप्रभावे अथ च स्वल्पसन्तुष्टे भवति दृष्टं खल्वतिमात्रमाश्चर्य्यम् । तथाहि—

(ख) तथा । अत्र उपसर्पतम् आर्य्यौ ।

तेजःपुञ्जो नरतनुरियान् सर्व्वतेजोऽभिभावी
गच्छन्नेकं विरमति कथं भारतं नाम वर्षम्।
उद्यन्नर्को भुवनमखिलं नन्वनाक्रम्य शाम्येत्
स्वीकर्त्तुं वा परभुवमियं वाधते स्वीकृता भूः ॥१२॥

टोडर। साधु। आविष्कृतं किल तदिदं वङ्गस्वाभाविकं वाक्पाटवम्।

मन्त्री। कुमार! अस्ति कश्चिन्महाकविस्ते शिक्षयिता?।

प्रताप। अस्त्येवम।

आक। (साशंसानन्दम्) अपि पूरयितुमर्हसि श्रीमन्! पादत्रितयान्तरेणेदम्?।

"खपुष्पाञ्जलौ राजतां स्लीपदाब्जे।"

प्रताप। (क्षणं विभाव्य)

कवीनां प्रवर्य्यैश्चिरं पूर्य्यते या
समस्या मया सैव चेत् पूरणीया।
विधावुष्णरश्मिः कृशानौ च शैत्यं
खपुष्पाञ्जलौ राजतां स्लीपदाब्जे ॥१३॥

आक। (सविस्मयानन्दम्) अहो रचनाचातुरी! अहो अवसरानुसारित्वम्! अहो विनयनैपुण्यञ्च!।

सर्व्वे। साधु। चमत्कारिणी शक्तिरायुष्मतः।

आक। प्रताप! नितरामेव प्रीतोऽस्मि। आसनं तावदलङ्क्रियताम्।

टोडर। मन्ये राज्यशासनौदासीन्येन नैपुण्यमन्विष्यते कवितायामेव कुमारेण।

शङ्कर। (स्वगतम्) हन्त! सार्वभौमसभायामपि कृतास्पदमेव तावदीर्ष्याकालुष्यम्। (प्रकाशम्) नन्वार्य्य! अत्रभवतः सम्भावनेयमपेक्षते प्रमाणोपन्यासम्।

टोडर। अत्रेदमेव प्रमाणम्; यदद्य त्रीनब्दान् यावत् भारतराजकोषो न करोति यशोरकरस्पर्शम्।

मन्त्री। तत् किमयमेव तत्रत्यो राजा संवृत्तः?।

टोडर। नास्तां तावत्। तथापि स्थविरताविकले पितरि यूनश्च सूनोरौदासीन्यमन्तरेण किन्तत्र कारणमन्यदनुसन्धेयं स्यात्?।

प्रताप। (जनान्तिकम्) वयस्य! इदं तदाशङ्कितचरम्।

शङ्कर। (जनान्तिकम्) यावदहं ब्रवीमि।

प्रताप। (जनान्तिकम्) नाहं कैतवरुचिः।

शङ्कर। (जनान्तिकम्) कुमार!

न श्रीराश्रयते लोकं सर्व्वथा कैतवोज्झितम्।
गन्तुमर्हति सन्मार्गं कथमेकमनेकदा ॥१४॥

आक। किमत्रोत्तरमायुष्मतः?।

शङ्कर। (साञ्जलि) देव! कुमारः स्वयमभिधातुमपत्रपमानो मन्मुखेनाभिधत्ते।

आक। कमत्रभवन्तमवगच्छामि?।

शङ्कर। कुमारसचिवमेव ब्राह्मणकुमारम्।

आक। अभिधीयतां तर्हि।

शङ्कर। तत्रभवान् यशोरराजः परमवर्षीयान् विक्रमादित्यः, पितृव्यतनये यवीयसि वसन्तराये समासज्य राज्यभारं स्वयमिदानीं नारायणपरायणः संवृत्तः।

आक। युज्यते।

शङ्कर। अथ तु कियता कालेन सञ्जातराज्यलोभो वसन्तरायो विद्विषन्निव कुमारं शिक्षाव्यपदेशेनास्मामन्तरयामास राजधान्याम्।

मन्त्री। तत् कियतो दिवसात् पूर्व्वम्?।

शङ्कर। शरदामेव त्रितयात्।

आक। तदेतावतः समयानसाक्षात्कारे किं कारणम्?।

शङ्कर। अन्तरेण हि पुण्यमवसरञ्च न घटत एव देवदर्शनम्।

आक। (स्वगतम्)

गिरिदुर्गमहो न दुर्गमं गहनं वा न भवेन्महावनम्।
गहनञ्च भृशञ्च दुर्गमं परकीयं मन एव मन्यते॥१५॥

भवतु। (प्रकाशम्) तदत्र किं कियन्ति दिनानि वा शिक्षते प्रताप इति वेदितुमिच्छामि।

शङ्कर। आगत एवासौ शस्त्रशास्त्रयोरुभयोरेव शिक्षायां दीक्षितः।

मन्त्री। बाढ़म्। तदेतदस्माभिरपि श्रुतपूर्व्वम्।

आक। अथ विदितमस्ति भवताम्, कीदृशस्वभावो वसन्तराय इति।

टोडर। देव! श्रूयते हि श्रोत्रपरम्परया, निरन्तर-शार्दूलसेविते महाकान्तारे निर्म्मितकान्तनगरो वशीकृत-प्रजासमाजश्च वसन्तराय इति।

आक। नन्वभिधीयतां तर्हि, विशेषेण दुर्द्दमस्वभावो नातिनिपुणश्चायमिति।

मन्त्री। सम्भाव्यते खल्वेतत्। यतः—

न खलु मृदुलशीलो हन्ति हिंस्रान्तरायं
नहि शशधररश्मिर्दाववदाहं विधत्ते।
न च वशयति मुग्धो मानवान् भिन्नवृत्तीन्
नहि सरलजलौघः पार्श्वनावं धुनोति ॥१६॥

आक। (स्वगतम्)

कृतघ्नता-दुर्जनता-दुरन्तताः
प्रत्येकमासां खलु दण्डकारणम्।
वसन्तराये समुदायशालिनि
सम्पन्नयोग्या विपदास्पदे हि तत् ॥१७॥

अथ तु सर्वथावितथ एवायमुपन्यासश्चेत्, तथापि तु—

त्रीन् वत्सरान् करमनर्पयतः करं किं
भूस्वामिनो भुवमवत्यपि सार्व्वभौमः।
तस्मात् करग्रहणतो हि स तादृशः स्यात्
वाध्ये च वाधविरहेऽनुमतिप्रतीतिः ॥१८॥

विशेषतश्च प्रतापोऽयमनाशंसितवाक्पाटवादिना परमं प्रीणयन् पुरस्कर्तव्य एव। तथा च—

गुणज्ञानां न्याय्यं गुणवति पुरस्कारकरणं
तिरस्काराधानं विगुणिनि जने वा प्रभवताम् ।
सुवर्णं सदृगं वितरति विधिः कृष्णमयसि
विभेदः को नु स्याद्गुणविगुणयोर्नन्वितरथा ॥१८॥

तत्र च कतिपयमुद्राप्रदानं राजपुत्रस्य ब्राह्मणसम्माननम्, प्रचुरतरार्थप्रतिपादनमात्मनो वणिक्व्यवहारः, महार्घमणिविशेषोपहारो निर्वासितस्याकिञ्चित्करः, राजोपाधिसम्पादनं राज्यहीनस्य प्रतारणापरपर्य्यायः, राज्यान्तरदानञ्चोभयथैवात्मनः चतिकरम् । तत् कः खलु पुरस्कारः स्यात्? (विचिन्त्य) भवतु । उच्छिन्नमेव पैतृकं राज्यं वसन्तरायादाच्छिद्य तावदस्मै पुरस्कर्त्तव्यम् । इत्यञ्च सर्वथैव सुविहितं स्यात् । लोकापवादस्तु दुर्निवार एव कर्म्मकर्त्तृणाम् । तथाहि यथैकपक्षप्रमाणोपन्यासपरिग्रहेण लोकापवादः, तथा पैतृकसम्पदः पुत्रायासमर्पणेऽपीति । अत एव हि—

प्रशंसां निन्दां वा न खलु गणयन्नेव निपुणः
क्रियां कुर्य्यादिष्टामविकलमतिं स्वामनुसरन् ।
गुणेऽपि स्यान्निन्दा जनसदसि दोषेऽपि च यशः
द्वयोरप्येकादृग्भवति हि मनो नैव जनयोः ॥२०॥

किञ्च, मन्ये खलु जनानां जनापवादः कल्याणोदर्क एव । तथा च—

दोषी जनो निजमुखे दधदन्यदोषं
कुर्य्याद्धिनिन्दितुमनास्तमदोषमेव ।
कर्षन् मलं हि वदनेन वनं वराहः
आलोड़यन् परममेव परिष्करोति ॥२१॥

(प्रकाशम्) प्रताप ! भवन्तं पुरस्कर्त्तुमिच्छामि ।

प्रताप । देव ! त्वद्दर्शनदानमेवास्मादृशेष्वतिगरीयान् पुरस्कारः ।

आक । एष तु प्रजामात्रस्याधिकारः ।

प्रताप । अहमपि यत्किञ्चित् प्रजामात्रमेव ।

आक । गुणमहिम्ना त्वयि महीयानतिरेकः साधारणात् ।

सर्वे । वाढ़म् ।

प्रताप । हन्त ! जगदीश्वर इव राजराजेश्वरोऽपि मादृशेषु सत्यसङ्कल्प एव ।

आक । साधु ; तत् समस्तमेव यशोरराज्यं ते पुरस्कर्त्तुकामोऽस्मि ।

सर्वे । अहो सौभाग्यम् ! अहो सुयात्रा !

प्रताप । (सविस्मय-धैर्य्यमात्मगतम्) हन्त ! कोऽयमाकस्मिको दैवदुर्नियोगः । (जनान्तिकम्) वयस्य ! तत् सम्प्रति किमत्र साम्प्रतम् ।

शङ्कर । (जनान्तिकं सोल्लासम्) स्वस्ति । सर्व्वथैव निष्पन्नमस्मदभीष्टम् ।

प्रताप। (सखेदं जनान्तिकम्) किमुच्यते निष्पन्नमभीष्टमिति।

गाढ़प्रत्ययतः पितेव निदधौ यस्मिन् भरं निर्भरं
यद्भार्य्या सुतनिर्विशेषमपुषत् मां मातृहीनं शिशुम्।
तातप्रेषितमेव मां सजलदृग्यश्च न्यषेधीन्मुहुः
तस्मिन्नेव कृतघ्नता न खलु मे सञ्जीवते राचते ॥२२॥

शङ्कर। (जनान्तिकं साशङ्कम्) कुमार! कोऽयं ते सुमहान् व्यामोहः? कथं वा स्वयमागतराजलक्ष्मीनिरासप्रयासः?।

प्रताप। (जनान्तिकम्) सखे! न खल्वयं मे व्यामोहः; अस्ति च सुधीरेव धीवृत्तिः। किन्तु—

पश्य नश्यति धर्म्मो मे स्याच्च मूर्त्तैव धूर्त्तता।
तदसन्तं सती लक्ष्मीः कथं लक्ष्योकरिष्यति ॥२३॥

शङ्कर। (जनान्तिकम्) ननु पृच्छामि किञ्चिद्भवन्तम्, त्वया खलु समधिगत एवेतिहासः, सीतामुद्धरिष्यतो रामावतारस्य छद्मना बालिवधः, राज्यमुज्जिहीर्षतो धर्म्मराजस्य द्रोणवधे वाक्‌चातुरी, पण्डितकुलपतेश्चाणक्यस्य च निर्जनारण्ये सिद्धार्थहत्या, तत् किमेभ्योऽपि धार्म्मिकतमस्त्वमिति।

प्रताप। (सोच्छ्वासमात्मगतम्) अहो! आर्य्यराज्यमुद्धर्त्तुमुद्युञ्जानस्य करणीयैवेयं प्रतारणेति ध्वनितं वयस्येन।

शङ्कर। (जनान्तिकम्) किञ्च, कुमार!

राज्यं वसन्तकरतः कररोधहेतो
प्रागेव नष्टमधुना च भवन्निरासात्।

तद्वो विनश्यति चिराय, परन्तु भावी
सम्राड् विमाननकृतः सुमहाननर्थः ॥२४॥

प्रताप। (स्वगतम्) हन्त! साधु सन्दर्शितं तावदभिन्नार्थिना वयस्येन। किञ्च—

स्वाम्याभावे स्वदेशेऽपि स्यात् किं देशान्तरेऽपि तत्।
असम्प्राप्तास्पदं वीजं कदाचिन्नाङ्कुरायते ॥२५॥

तन्मानयिष्याम्येव भारतपतेः सङ्कल्पम्। तेन च—

निन्दादुन्दुभिनादवाधितपटुश्रोत्रश्रुतिर्नश्यतु
हस्तस्रस्तसमस्तराज्यविभवो ज्ञातिः स वा सीदतु।
लप्स्ये प्राक् च तथापि राज्यमधुना पश्चात् पुनः पश्चिमं
पूर्वं केवलपूर्व्वपर्वतमिनः सर्व्वं क्रमात् क्रामति ॥२६॥

अथवा लुप्तप्रायसम्पदः स्वांशसमर्पणेन विरागविद्वेषयोः पदे प्रत्युत रागसन्तोषावेव प्रतिपत्स्ये पितृव्यस्य।

आक। तत् किमस्मिन्नतिरिक्तं विवेक्तव्यमस्ति राजपुत्रस्य?।

प्रताप। देव! न किञ्चिदतिरिक्तम्। किन्त्वेतावाननुग्रहोऽपि निग्रहपर्य्यवसान एव भवितेति विविच्यते।

आक। कथमिव?।

प्रताप। चिराय लब्धास्पदो दुर्द्दमस्वभावश्च वसन्तरायो न खल्वन्तरायमन्तरेणाङ्गीकरिष्यति पराधिपत्यमिति।

आक। तत् किमस्मदादेशमेव न मानयेत्?।

मन्त्री। देव! मानयन्नपि रचनाचातुरीमात्रेण चरिता-

र्थं तामोहृशोमस्य सन्दिहानो बन्धुरपि प्रतिबन्धुमर्हतोति नूनमाशङ्का प्रतापस्य ।

आक । सङ्कुच्छते तावत् ।

टोडर । अत्र निवेदयामि यावत् । प्रतापेन हि—

तद्देयकरदानेन तद्ग्राह्यं प्रतिगृह्यताम् ।
करस्पर्शनमूलो हि भूभोगो निम्नभूपतेः ॥२७॥

इत्थञ्च मन्ये सर्वत एव सुविहितं स्यादिति । तथा च—

दिल्लीश्वरः प्राप्य यशो विसारि प्राज्यं प्रतापश्च यशोरराज्यम् ।
स्वयोग्यदण्डञ्च वसन्तरायः करञ्च तं राजतु राजकोषः ॥२८॥

आक । अहा ! ध्रुवमाविष्कृतः सर्व्वत एव समोचीनः पन्थाः । किन्तु किमिदानोमिवार्हति प्रतापस्तावन्तमिवार्थमुपहर्त्तुम् ? ।

शङ्कर । देव ! मितव्ययिनः कुमारस्य निजस्वं प्रवासाय पितृदत्तञ्च प्रायेणैव सञ्चितमास्ते ; कराय पर्य्याप्तञ्च तत् ।

आक । साधु । तेन हि—

पृथ्वीं नागपतौ, द्युतिं दिनपतौ, गाम्भीर्य्यमम्भोनिधौ
व्याम्नि व्यापकतां गिरौ च गुरुतां संस्थाप्य सुस्थो विधिः ।
इत्यालोच्य निधीयतेऽद्य विधिवत् राज्यं प्रतापेऽधुना
योग्यं योग्यजनेऽर्पितं प्रतनुते शान्तिं हि, शङ्कान्तु न ॥२९॥

तदधुनैव विधीयतां करादानपूर्वकराज्यदानोपस्कृतमालेख्यपत्रम्, अभिधीयताञ्च सान्धिविग्रहिकाय द्वादश सहस्राणि राजपुतयोधानां दश सहस्राणि च मोगलभटानां प्रताप-

सार्थीक्रियन्तां, दीयताञ्च तेष्वादेशो यत् वङ्गीयनवावेऽपि प्रतीपे प्रतापस्यैव कामचार इति ।

प्रताप । अहो ! चमत्कारिता प्रसादस्य ।

चिराच्चिंनातः परमेव केवलं वरं प्रदत्ते जगदीश्वरो जने ।
दिल्लीश्वरो दर्शनमात्रमत्र तु ददात्ययं तन्ननु सानुषङ्गकम् ॥२०॥

मन्त्री । कुमार ! तर्हि किन्तावदेतावतो दानस्य प्रतिदानं मन्यसे ? ।

प्रताप । असम्भवमेवास्य प्रतिदानं मादृशानाम् । येन हि सागरादेव लब्धसत्ताकस्य वर्षोदविन्दोर्न खल्वात्मदानमपि तस्य प्रतिपादयति प्रतिदानोपकारम् ।

मन्त्री । अस्त्येवम् । किन्तु—

पर्य्याप्तदानविषये नृपतेः प्रजानां
तद्भक्तिरेव परमा प्रतिदानरूपा ।
कुल्याजलं यदनुयाति नदीं, तदेव
तस्यात्मलाभकृतिनिष्कृतिमामनन्ति ॥२१॥

प्रताप । (सानन्दम्) साधूपदिष्टं तावन्महामात्येन । तेन हि—

आत्मीयामेव गामेतां स्वीकृत्य परिरक्षितुम् ।
यथाशक्ति यतिष्येऽहं यदि देवः प्रसीदति ॥२२॥

आक । (प्रतापहस्ते लेख्यमर्पयन् सानन्दम्) प्रताप !
प्राज्यैश्वर्य्ययशोरराज्यमखिलं तल्लेख्यपत्रान्वितं
सैन्यान् जन्यजयक्षमानपि महाराजेत्युपाधिं त्वयि ।

भक्तिस्वीकृतिमाददन्ननु ददे, स्वल्पोऽपि मूल्यान्महान्
स्वर्ण स्याण्वयमस्य हि समः, स्वस्त्यस्तु यान्तु प्रजाः ॥२३॥

प्रताप। (भूतलपर्य्यन्तावनतो गृह्णाति।)

सर्व्वे। (सानन्दम्) जयति यशोराधीश्वरो महाराजः प्रतापादित्यः।

शाक। स्वस्ति। अवसिता खल्वियमद्यतना परिषत्।

(इति निष्क्रामन्तं वादसाहं प्रणमन्तः सर्वे निष्क्रान्ताः।)

—०—

इति राज्यलाभो नाम चतुर्थोऽङ्कः।

—०—

पञ्चमोऽङ्कः ।

——:००:——

ततः प्रविशति इच्छामतीनदीतीरे यवनवेशधारी
मदनमल्लो नवावसेनापतिः कतिपये च
पटमण्डपसम्भारहस्ता
यवनसैनिकाः ।

सेनापतिः । अये ! प्रस्थानप्रस्ताव एव त्वयेदं व्याहृतमासीत्, यथा—"यशोरासन्नमातामहावासे खल्वहमाकैशोरमस्मि कृतप्रवास इति स प्रदेशो मे सर्वतो विदित" इति । तद्ब्रूहि—कियद्दूरे यशोरम, कस्तत्रोपस्थानमार्गः, कश्चोपयोगी देशः शिविरसन्निवेशायेति ।

मदन । पहो ! इदो जोअणजुअं जसोरं । अरिहदि क्खु जलमग्गेण थलमग्गेण वा तहिं गच्छिदुं । एदं ज्जेव अ ठाणं सिविरट्ठावणस्स । जेण हि पच्छिमे णई, दक्खिणे पुव्वे अ विसाला कुल्ला, उत्तरे अ ससेदुअं पल्ललं दिट्ठं । ता उत्तरदो ज्जेव दुआरं हुविस्सदि । तहिं अ अणुट्ठिदे सावहाणं रक्खाहिआरे णत्थि क्खु विवक्खसङ्कान्ति । (क)

(क) प्रभो ! इतो योजनयुगं यशोरम्, अर्हति खलु जलमार्गेण स्थलमार्गेण वा तस्मिन् गन्तुम् । एतदेव च स्थानं शिविरस्थापनस्य । येन हि, पश्चिमे नदी, दक्षिणे पूर्वे च विशाला कुल्या, उत्तरे च

सेना । (सावज्ञम्) आः ! परिहर विपक्षप्रस्तावम् । केवलं बङ्गेशवासनयैव तावदनुष्ठानम् । अन्यथा—

क्षुद्रं भूस्वामिनं जेतुं न युक्तोऽयं महोद्यमः ।
कः कुर्य्यान्मूषिकं हन्तुं बृहन्नालीकयोजनम् ॥१॥

मदन । ता सुट्ठु भणिदं पहुणा । अहन्तु तुह्माणं सणिहाणे तं क्खु तदोवि लहुं पेक्खामि । (आत्मगतम्) समओ दाव आअच्छदु, तदो मूसिअत्तणं पेक्खाविस्सं । (ख)

सेना । भवतु तावत् । (सैनिकान् प्रति) अये ! इतस्तावदुत्तरतः क्रमशः सन्निवेश्यन्तां पटमण्डपाः । मध्ये च सौधसन्निभं भविष्यति वासभवनं नवाबस्य । (इति निष्क्रान्तः ।)

मदन । (स्वगतम्) जह ज्जेव कुमारो दिल्लीदो णिग्गदुअ पाड्णां उवत्थिदो, तह ज्जेव सुन्दरेण गदुअ सव्वं आचक्खिदो । तहिं अ कुमारस्स एसो आदेसो जं "जवणकवड़ेण णवाबसेणां पविसिअ सिविरट्ठावणदेसं अ जाणिअ पढमं ज्जेव विस्सवेहि"

ससेतुकं पल्वलं दृष्टम् । तदुत्तरत एव द्वारं भविष्यति । तस्मिंश्चानुष्ठिते सावधानं रक्षाधिकारे नास्ति विपक्षशङ्केति ।

(ख) तत् सुष्ठु भणितं प्रभुणा । अहन्तु युष्माकं सन्निधाने तं खलु ततोऽपि लघुं प्रेक्षे । समयस्तावदागच्छतु ततो मूषिकत्वं प्रेक्षयिष्यामि ।

(ग) यदैव कुमारो दिल्लीतो निर्गत्य पाटनामुपस्थितः, तदैव सुन्दरेण गत्वा सर्व्वमाख्यातः । तस्मिंश्च कुमारस्य एष आदेशो यत्, "यवनकपटेन नवाबसेनां प्रविश्य शिविरस्थापनदेशञ्च ज्ञात्वा प्रथममेव

त्ति। तदोअ मए सव्वं अणु चिट्ठिदं। इदो वि णवाअद-वीरेन्द-मुहादो सुणिदं जह, "ससेणिओ कुमारो इमाए ज्जेव णईए पच्छिमे तीरे णिहुदं उवट्ठिदो, धीरेन्द-मुउन्दो अ लहुं लहुं अणेअ तरीओ आणेदि" त्ति। ता अहं तुवरन्तो तत्त गदूअ सव्वं विण्णवेमि। (इति त्वरितं निष्क्रान्तः।) (ग)

(सैनिकाः पटमण्डपं विरचय्य सन्निहितक्षेत्रेभ्यो मूलकानि खादन्ति)।

प्रविश्य कृषकः। अह्मो! को तुमं मूलअं खाअसि। (घ)

सैनिकः। तुह तादो। (ङ)

कृषकः। किं मह तादो। ता आअच्छ, अउव्वं तादं जीअन्तं ज्जेव समाहित्थं करेमि। (च)

सैनिकः। (अर्द्धभुक्तं मूलकं कृषकाङ्के निक्षिपति।)

कृषकः। अरे सालअ! अरे सालअ! खाअसि मह

विज्ञापय" इति। ततश्च मया सर्व्वमनुष्ठितम्। इतोऽपि नवागत-वीरेन्द्रमुखात् श्रुतं यथा—"ससैनिकः कुमारः अस्या एव नद्याः पश्चिमे तीरे निभृतमुपस्थितः, धीरेन्द्रो मुकुन्दश्च लघु लघु अनेकतरी-रानयती"ति। तदहं त्वरमाणः तत्र गत्वा सर्व्वं विज्ञापयामि।

(घ) अहो! कस्त्वं मूलकं खादसि?।

(ङ) तव तातः।

(च) किं मम तातः। तदागच्छ, अपूर्वं तातं जीवन्तमेव समाधिस्थं करोमि।

मूलअं उवहससि अ । ता चिट्ठ तुमं मूलअं खाआवेमि । (इति कुद्दालमुद्यम्य धावति ।) (छ)

सैनिकः । ता आअच्छ दासीए पुत्ता । (इति निष्क्रान्ताः क्षपकसैनिकाः ।) (ज)

ततः प्रविशति कल्याणीचित्रमादाय स्वपटमण्डपगतो नवावः ।

नवावः । (चित्रमवलोक्य) अहो ! शिल्पिना यदि न किञ्चिदतिरञ्जितं चित्रस्य । तदा तु—

उदयति शरदिन्दुः किं वृथासस्या मुखास्ते
विकसति कमलं किं लोचनोन्मीलनेऽपि ।
बलति किमु मृणालं बाहुसन्दर्शनेऽपि
स्फुरति सति किमङ्गे शारदी कौमुदी वा ॥२॥

हन्त ! विवेकविहीनो विधाता । यदि हि सृष्टमिदमपूर्वं रत्नम्, तर्हि किं नाम विन्यस्तं पर्णशालायां दरिद्रस्य । अथवा शङ्करो दरिद्र इति बुद्धिदरिद्राणामेव प्रलापः । कुतः—

वङ्गदेशपतिरेष सर्वथा
यस्य याचकतया समाकुलः ।
तत्तु रत्नमभिभाति यद्गृहे
तस्य सम्भवति किं दरिद्रता ? ॥३॥

(छ) अरे श्यालक ! अरे श्यालक ! खादसि मम मूलकम् उपहससि च । तत्तिष्ठ, त्वां मूलकं खादयामि ।

(ज) तदागच्छ दास्याः पुत्र ! ।

तथा च—

यस्यास्ति प्रियवस्तुसाररमणीरत्नं, सदा तस्य तु
सौधं पर्णगृहं, कदन्नममृतं, भूः स्वर्णपर्य्यङ्किका।
तद्यस्यास्ति न तस्य तु प्रतिपदं सर्वं विपर्य्येति तत्
जीवानां सुखदुःखयोर्हि नियमः स्वाभीष्टविद्विष्टतः॥४॥

(विशेषेण चित्रमवलोक्य) अहो! सर्वाङ्गसङ्गिन्येव चारुता चमत्कारिणी खलु तत्रभवत्याः। तत् किं नाभरण-मनुगृह्णाति। आं ज्ञातम्। स्वपोषणपरिश्रान्तस्य तपस्विनः कुतस्तत् सामग्रीसंग्रहः। (सविषादम्) हन्त विधातः!

सुदृशि चेटसमा सुषमाहिता
ननु तदाभरणैः किमु वञ्चिता।
वदतु वस्तु निसर्गमनोहरं
नहि विहित्रिमकान्तिमपेक्षते॥५॥

(पुनरवलोक्य) साधु साधु, अस्या हि कुटिलता केशकलापे, कठिनता स्तनमण्डले, चञ्चलता चेलाञ्चले, विच्छायता परिच्छदे, कलङ्कश्च लोमाध्वनीति चित्रदर्शनादुन्नीयते। तत् किमियं प्रवातमासेवमाना रचयति केशसंस्कारम्। आं सम्यगनुलक्षितम्। तथा च—

वामेन केशमवधृत्य करेण पश्चात्
दक्षेण कङ्कतिकया विजटीकरोति।
आस्फालितं कुचयुगं घन-पीन-तुङ्गं
यूनो युयुत्सत इवेह सहोरसास्याः॥६॥

तन्मन्ये—नागरधुरीणेन शङ्करेणैव चित्रितेयमुन्मुक्तास्तनी । कथमन्यथा कुललललनां खल्विमामोष्टशोभपरः पश्येत् ; अपश्यन् वा कथं चित्रयेत् । (सोल्लासम्) तत् कथमियं पर्ण-शालायामवतिष्ठते, कथं वा तपस्विनमासेवते नाम । न खलु राजते सरोजिनी गोमयचत्वरे, नवासौ मूषिकमुपतिष्ठते कदाचित् । तत एव हि मम तावानुद्यमः । (विचिन्त्य सासूया-मार्षम्) तत् किं कल्याणीपरित्राणं कल्याणोदर्कं भविष्यति दुरात्मनः प्रतापस्य ? कदापि न । येन हि—

गृह्यमाणां गजेन्द्रेण परिफुल्लारविन्दिनीम् ।
अपसारयतस्त्राणं कराद्भवति किं कपेः ? ॥७॥

भवतु । कल्याणीप्रत्यानयनं यावदन्तरान्तरा तच्छायानु-गृहीताभिर्नक्तकोभिर्विनोदयितव्यं मन इत्यस्तुग्रपदेशः । कथं चिरयति प्रियवयस्यो मे तोरावः ।

ततः प्रविशति नर्त्तकीरादाय तोराव-आलिः ।

नवावः । (विलोक्य) स्वागतं प्रियवयस्य ! उपविश्यताम् । भवतः खलु समयक्षेपमवेक्ष्य बलवदुत्कण्ठितं मे मनः ।

तोरावः । ता एत्थ अहं ण अवरज्झिम्हि । जेण हि एत्थ तिस्सो पमदाओ णूदणाणं मज्झदो आणीदाओ । ता एक्का णववहू पवलविट्टिगदा कमलिणी व्व ओणदमुही केवलं अस्सु मुञ्चदि । अवरा अ पवादत्थिदा पादवक्खलिदा लदा व्व

(क) तदत्राहं नापराध्यामि । येन हि अत्र तिस्रः प्रमदा नूतनानां मध्यादानीताः । तदेका नववधूः प्रबलवृष्टिगता कमलिनीव अवनतमुखी

भिसं वेवदि। अखा अ वात्राव्भमिदा मडुअरी व्व तुह्मीं त्थिदा। ता इमाओ अहिमुही करिअ आअच्छिदुं एरिसो समअक्खेवो जादो। (झ)

नवाबः। वयस्य! अचिरापनीतास्वेतावान् भवतः कथमाग्रहः।

तोराब। अणेअसो चव्विदासुं इक्खुजट्ठिसुं कहं रसो पावीअदि त्ति। (ञ)

नवाबः। (अपवार्य्य) वयस्य! यत्तर्कयामि ममासन्ने खल्वेताः शालीनतामेव केवलामनुशीलयथ्यन्तीति।

तोराब। तहिं क्खु णिसाअरणिअड़े कुमुदिणीणं वि सालीणत्तणं तक्केहि। (ट)

नवाबः। तत् प्रस्तूयमिदानीम्।

तोराब। (नूतनाः प्रति) वालिआओ! ता चलदु तुह्माणं झणक्करमणोहरं चलणं, पसलदु अ कोइलामहुरो कण्ठसरो। (ठ)

केवलं अश्रु मुञ्चति। अपरा च प्रवातस्थिता पादपस्खलिता लतेव भृशं वेपते। अन्या च वात्याभ्रमिता मधुकरीव तूष्णीं स्थिता। तदिमा अभिमुखीकृत्य आगन्तुमीदृशः समयक्षेपो जातः।

(ञ) अनेकशश्चर्वितासु इक्षुयष्टिषु कथं रसः प्राप्यत इति।

(ट) तस्मिन् खलु निशाकरनिकटे कुमुदिनीनामपि शालीनत्वं तर्कय।

(ठ) वालिकाः! तच्चलतु युष्माकं झणत्कारमनोहरं चरणम्, प्रसरतु च कोकिलामधुरः कण्ठस्वरः।

(नूतना नर्त्तक्यः तूष्णीमधोमुख्यस्तिष्ठन्ति ।)

तोराव । ललिदाओ ! तुह्मे हिं णिच्चन्तीहिं गाअन्तीहिं अ तत्तभअदा हिअअं आवज्जिअ भन्ति ज्जेव पञ्जङ्को अलङ्करीअदु । (ड)

तास्तथैव तिष्ठन्ति ।

नवाव: । (विरक्तिमभिनीय) वयस्य ! विफलोऽयं भवतः प्रयासः । कुतः—

विकसिता स्वयमेव सरोजिनी
मधु ददाति पिपासु-मधुव्रते ।
न तु निमीलसरोजमुखीं स तां
विधुनयन्नपि लब्धुमिदं क्षमः ॥८॥

तत् प्रवर्त्तय तावत् परीक्षितगुणा एव प्रमोदाय ।

तोराव । (सरोषम्) ता चिट्ठध तुह्मे, वेत्तलदा ज्जेव इन्दीवरं णाआविस्सदि । (अपराः प्रति) भअवदीओ ! उच्चिष्ठध तुह्मे । (ढ)

अपरा नर्त्तक्यो नृत्यन्त्यो गायन्ति ।

मन्दमन्द-गन्धवहो वहति शीतलः कूजति कोकिलः ।
परमसुखे कुसुममुखे वसति मञ्जुलः भ्रमरो बहुलः
सेवितवञ्जुलः ।
अमृतसन्निभं चरति दुर्लभं
कुसुमसम्भवं मधुरसौरभम् ।
शीतलकरो रजनिकरो राजति निर्म्मलः, नभसि धवलः
परमकोमलः ।

तोराव । (अन्तरान्तरा "कुहु कुहु" "गुण् गुण्" इत्यादिना विविधभङ्ग्या यथायथमभिनयति ।)

नवाव: । (सानन्दम्) साधु साधु, मधुरमासां सङ्गीत-सहचरं नृत्यम् । वयस्य ! तारुण्यलावण्यपूर्णानां हि सुन्दरीणाम्—

झणिति झणिति नादः सञ्चरन् पुरस्य
ललितचपलतायामीषदीषच्च लज्जा ।
विविधनयनभङ्गी हेतुशून्यं स्मितञ्च
युवजनमदकार्य्ये मद्यभूतान्यमूनि ॥९॥

अपि च—श्रोत्रैः सह स्वरसुधालहरीं प्रचित्य
साकं सनूपुरपदं मनसा प्रणर्त्त्य ।
भङ्गिं विधाय विविधाञ्च विमोह्य सभ्यान्
सङ्गीतनृत्यनिपुणा वशमानयन्ति ॥१०॥

तोराव । सुणिदं भवदीहिं ? । जं णिच्चेण गीदेण श्र तुह्मेहिं सश्रं वङ्गेश्वरो वसीकिदो त्ति । ता मए ज्जेव जहत्थाणं अप्पणो कोइलकण्ठसंजोश्रं कदूश्र तुह्मे सलाहणिज्जा

(ङ) ललिताः ! युष्माभिर्नृत्यन्तीभिर्गायन्तीभिश्च तत्रभवतो हृदयमावर्ज्य झटित्येव पर्य्यङ्कः अलङ्क्रियताम् ।

(ध) तत् तिष्ठत यूयम्, वेललता एव इतः परं गापयिष्यति । भाग्यवत्यः ! उत्तिष्ठत यूयम् ।

(ण) श्रुतं भवतीभिः । यत् नृत्येन गीतेन च युष्माभिः स्वयं वङ्गेश्वरो वशीकृत इति । तन्मयैव यथास्थानमात्मनः कोकिलकण्ठ-

किदा । (नवावं प्रति) वअस्स ! ता इध ज्जेव किं तुए वअदावावारो अणुचिट्ठिदव्वो ? । (ण)

नवावः । नूनं कल्याणो खल्वितोऽपि कल्याणतरा भविष्यति ।

तोराव । ता कह अवगच्छीअदि ? । (त)

नवावः । उक्तं हि गायन्तीमेवात्रभवतीमवलोक्य निराश-निवृत्तैरधिकृतैः ।

वीणायां स्वरमाधुरी, शशधरे पीयूषधारास्रुतिः
पद्मिन्यामपि केवला मृदुलता, बिम्बे तथा रक्तता ।
आकर्णं हरिणि च दृष्टिरिह तु व्यक्तं समस्तं हि तत्
सा तस्मात् किल कीदृशीति विकला जानीमहे नो वयम् ॥११॥

तत्र यदि न प्रत्ययस्तदेदमेव तावत् प्रत्यक्षीक्रियतां तैरुपहृतं चित्रम् । (इति चित्रं दर्शयति ।)

तोराव । (निपुणमवलोक्य) अदो ज्जेव तुह एत्तिओ उज्जमो । (थ)

नवावः । नैतावन्मात्रं प्रयोजनम् । कदाचित्तु कुतोऽपि कारणाद्वामनशर्म्मा नाम कश्चन तपस्वी कारानिवासेन

संयोगं कृत्वा यूयं श्लाघनीयाः कृताः । वयस्य ! तदिहैव किं त्वया वशताव्यापारः अनुष्ठातव्यः ? ।

(त) तत् कथमवगम्यते ? ।

(थ) अत एव तवैतावानुद्यमः ।

दण्डितः। विधवात्मजासमेतः परिजनश्चास्य समासादयितु-मनुज्ञातः। स पुनः सपरिजनः शङ्करमासेवमानः प्रणाश-मिवोपगतः। ततश्च दण्डान्तरं शङ्करं स्पृशतीति तमादातुं प्रथमं प्रहिताः प्रतिहताः। अथ तु तं ससर्व्वस्वमुपग्रहीतुं प्रेषिते बलवति बले अकस्मादुपेत्य दुरात्मना प्रतापादित्येन सर्व एव विद्रोहिणः स्वयशोरमुपनीता इति तद्दमनमेवाद्यं प्रयोजनम्।

तोराव। कल्लाणीग्गहणं ज्जेव अज्जं पत्तअणं त्ति कहेहि। (द)

नवावः। (स्मितं कृत्वा) दमिते च तस्मिन् साङ्गैव कार्य्यसिद्धिः सम्पद्यते नाम। तथापि प्रतापतो विद्रोहिणा-मुपादानमेव प्रयाणप्रयोजनमिति तावदास्तां लोकवादः।

तोराव। होदु दाव। अहं उण अप्पणो परिस्समं सात्थअं करेमि। (इत्युत्थाय नवीनानां प्रत्येकं चिवुकमुन्नमय्य) ललिदे! लदणभूदे! गोलावमहुरे! एक्कं वि दाव विदर सुरसुहां। अमिअं खाइस्ससि, सणुपज्जङ्के सइस्ससि, वङ्कस्सरकण्ठे लइस्ससि, विलाससाअरे अ अवगाहिस्ससि। (ध)

(द) कल्याणीग्रहणमेव आद्यं प्रयोजनमिति।

(ध) भवतु तावत्। अहं पुनरात्मनः परिश्रमं सार्थकं करोमि। ललिते! रत्नभूते! गोलापमधुरे! एकामपि तावद्वितर स्वरसुधाम्। अमृतं खादिष्यसि, स्वर्णपर्य्यङ्के शयिष्यसे, वङ्कश्वरकण्ठे लगिष्यसे, विलाससागरे च अवगाहिष्यसे।

(नवीनाः । अवनतवदना एवाश्रूणि मुञ्चति ।)

तोराव । सोहणी ! मिदुले ! बालिए ! एहि अहिमुही हुविअ गाहि दाव । (इत्यभिमुखी कर्त्तुमारभते ।) (न)

(नवीनाः । परावर्त्तन्ते ।)

नवाव: । (विरक्तिमभिनीय) आः परिहर दास्याः पुत्रीः ।

तोराव । (वेत्रलतामुद्यम्य) रे दासीए पुत्तीओ ! दाणिं वि तुह्माणं णिब्बन्धो । (इति प्रहर्त्तुमुद्युङ्क्ते ।) (प)

नवीनाः । गायन्ति ।

शङ्कर ! संहर　　तिमिरमतिदुस्तर-
मवतर वितर करुणाम् ।
कुलजा वनिता　　विपदि पतिता
सहते दारुणयातनाम् ।
दूषितमपि यौवनं　　विफलमिह जीवनम्
उपहर विपदि सान्त्वनाम् ।
भवतु मम मरणम्　　अचिरमिह शरणम्
पूरय पुनरिति कामनाम् ।

तोराव । अरे ! मरक्कन्दणं करेसि । (इति वेत्रलतया प्रहरति ।) (फ)

(न) शोभने ! मृदुले ! बालिके ! एहि अभिमुखीभूत्वा गाय तावत् ।

(प) अरे दास्याः पुत्राः ! इदानीमपि युष्माकं निर्बन्धः ।

(फ) अरे ! मरक्रन्दनं करोषि ।

नेपथ्ये पूर्वस्याम्। हर हर हर महादेव! गुड़ुम् गुड़ुम् दुम्।

नवाबः। (ससम्भ्रममुत्थाय) तत् किमित्यकस्मात् पूर्वतः च्वेड़ितनादो हिन्दूनां शतघ्नीगर्जनञ्च।

तोराव। (सत्रासम्) वअस्स! रक्ख रक्ख मं। (इति नवावपृष्ठमवलम्बते।) (ब)

नेपथ्ये उत्तरस्याम्। हरे हरे हरे हृषीकेश! गुड़ुम् गुड़ुम् दुम्।

नवाबः। आः कः कोऽत्र भोः! ज्ञायतां किमेतत्।

नेपथ्ये पश्चिमायाम्। कालि कालि कालि दानवद्राविणि! गुड़ुम् गुड़ुम् दुम्।

तोराव। वअस्स! वअस्स! ता किं एत्थ करणिज्जं?। (भ)

नवाबः। (ससम्भ्रमम्) आः कथं वार्त्तापि नोपलभ्यते।

प्रविश्य ससम्भ्रमं प्रतिहारी। भट्टारअ! अच्चाहिदं अच्चाहिदं। (म)

नवाबः। किन्नु खलु स्यात्?।

प्रति। आक्कन्ता ह्म। (य)

नवाबः। अये! केन?।

(ब) वयस्य! वयस्य! रक्ष रक्ष माम्।

(भ) वयस्य! किमत्र करणीयम्।

(म) भट्टारक! अत्याहितम् अत्याहितम्।

(य) आक्रान्ताः स्मः।

प्रति। पदावादिच्चहदासेण। (र)

नवाव:। धिक् सन्त्रासम्। प्रकृतिस्थो विशेषं ब्रूहि।

प्रति। पूव्वदो सङ्करेण, उत्तरदो सूज्जकन्तेण, पच्चिमतो अ सअं पदावहदासेण आक्कन्ता ह्म त्ति सेणावइ कहेदि। (ल)

नवाव:। आ: चोदीयसामयमचिन्त्य: प्रक्रम: संवृत्त:।

पङ्गुर्लङ्घयते गिरिं, क्षितिगतो धत्ते विधुं वामन:
दर्पान्धं विजिगीषते मृगशिशु: सिंहं द्विपेन्द्रद्विषम्।
खद्योतो द्युतिभिर्दुनोति तरणिं, तार्क्ष्यंश्च धावत्यहि:
मामेवाक्रमणीय एष सहसा दुर्बुद्धिराक्रामति ॥१२॥

प्रति। ता भट्टारअ! अणुण्णां अवेक्खदि सेणावइ। (व)

नवाव:। अये! इदानीमप्यनुज्ञापेक्षा।

तूर्णं चूर्णयतु प्रवान्तगुड़कै: शत्रून् शतघ्नीशतं
प्रोच्चण्डै: खलु खण्डखण्डमसिभि: कुर्वन्तु तान् बर्बरान्।
धानुष्का: शतश: शिरांसि विशिखै: सम्पातयन्तु द्विषाम्
एकोऽपि प्रसरेत् यथा न समरात् सर्वं यतेरंस्तथा ॥१३॥

प्रति। तह। (इति निष्क्रान्त:।) (श)

नेपथ्ये वंशीध्वनिसमनन्तरमेव पूर्वोत्तरपश्चिमतो युगपत् आल्ला आल्ला आल्ला हो। गुड़ुम् गुड़ुम् दुम्।

(र) प्रतापादित्यहताशेन।

(ल) पूर्वत: शङ्करेण, उत्तरत: सूर्य्यकान्तेन, पश्चिमतश्च स्वयं प्रतापादित्यहताशेन आक्रान्ता: स्म इति सेनापति: कथयति।

(व) तत् भट्टारक! अनुज्ञामपेक्षते सेनापति:। (श) तथा।

नवावः । साधु, साम्प्रतमात्मानुरूपमनुष्ठीयते नाम मोगलप्रवीरैः । (नेपथ्ये कलकलमाकर्ण्य) धिक् साहसिक्यं दुर्बलपशूनाम् । शलभानामग्निप्रवेशः स्वदाहाय, सारङ्गाणां वागुरोत्प्लवनमात्मबन्धनाय, बालिशानां ह्रदावगाहनं नक्रोदरपूरणाय, मण्डूकानामाशीविषफणारोहणं तत्तृप्तिसाधनाय, दुर्मतेः प्रतापस्य चास्मदाक्रमणं स्वध्वंसाय । तस्मादचिरमेव—

दुरात्मा प्रतापः प्रतापाभिमानी
प्रजापि प्रजाता तदिच्छानुवृत्ता ।
यशोरं समस्तं तदस्तं विधेयं
वर्त्तेकापराधादनेके विपन्नाः ॥१४॥

(नेपथ्ये । महान् कलकलः ।)

नवावः । (आकर्ण्य) वयस्य ! देहि मे दूरवीक्षणम् ।

तोराव । (दूरवीक्षणं ददाति ।)

नवावः । (गृहीत्वा मञ्चमारोहति ।)

तोराव । (सत्रासम्) वअस्स ! वअस्स ! मा दाव उत्थावेहि मत्तअं, गुलिआ पड़िस्सदि । (ष)

नवावः । धिङ्मूर्ख ! । (समन्तादवलोक्य) पूर्वतः पश्चिमतश्च दक्षं नायकनिकायं सन्निवेश्य स्वयमुत्तरस्यां प्रवृत्तः सेनापतिः । तदस्यां कोऽपि विशेषो भविष्यति । (निपुण-

---

(ष) वयस्य ! वयस्य ! मा तावदुत्थाय मस्तकम्, गुलिका पतिष्यति ।

मवलोक्य) आं ज्ञातम्—क्रोशमात्रान्तरे सरित्प्रवृत्ता पूर्व-पश्चिमवाहिनी काचित् कुल्या, केनचित् सेतुना च संयुक्त-मुभयतीरमस्याः। तदेनमेव सेतुमासादयितुमुपक्रमते सेनापतिरिति। कथं सेतुमुखव्यादत्तमुखायाः अतएव सन्ततविपक्षविक्षिप्तगुलिकाभिः प्रतिहता प्रतिनिवर्त्तते तावदस्मत्सेना।

नेपथ्ये पश्चिमतः। कालि! कालि! कालि! दानव-द्राविणि!।

नवावः। तत् कथमकस्मात् प्रतीच्यां हिन्दूनां क्ष्वेरितनादः। (विलोक्य) हा हन्त! हा हन्त! पूर्वगामिना सूचीमुख-व्यूहेन भिद्यते मे दक्षिणोत्तरलम्बिनी सेना प्रतापेन। आः तदत्रैव संवृत्तो गरीयान् सम्मुखसम्प्रहारः। तथाहि—

शस्त्रीभिस्तरवारिभिः सपदि हृत्कण्ठं छिनत्त्युल्बणः
शूलैर्विध्यति, मुद्गरैर्विदलति प्रासैः समाकर्षति।
अन्योन्यं खनति प्रदश्य दशनान् नालीकनालैः पुनः
मुष्टामुष्टि कचाकचि प्रकुरुते प्रक्षीणशस्त्रो भटः॥१५॥

तत् कोऽयं राजच्छत्र-परिच्छन्नोत्तमाङ्गस्तुरङ्गमारूढो वज्र-मुष्टिना विधूनयन्नुत्तालकरवालं विच्छिन्दन्नस्मत्सेनां प्राचीमभिधावति?। आं ज्ञातम्—दुरात्मा प्रतापः खल्वयम्। अथवा सार्थकनामा महात्मा प्रतापादित्यः। यत् सत्यं तर्कयामि—एष तावद्दैवतानुग्रहप्रसूतः कोऽपि महिमा स्यात्। कथमन्यथा—

विलस्थो मूषिकः क्षुद्रो गजेन्द्रं विजिगीषते।
कनीयांश्च कणो वह्नेर्महाब्धिं दग्धुमिच्छति ॥१६॥

नेपथ्ये उत्तरतः। हरे! हरे! हरे! हृषीकेश!।

नवावः। किं पुनरुत्तरस्यामाम्रेडितं हिन्दूनाम्। (विलोक्य) आः! सेतुमुखप्रक्षिप्ता विपक्षशतघ्नीयमुद्गिरत्यविच्छिन्नमग्निच्छटासम्पातम्। हा कथं प्रतिघ्नन्तोऽपि नार्हन्त्यवस्थातुमस्मत्सैन्याः। हा धिक्! हा धिक्! कथममी मुक्तकच्छाः समरादैशानीं प्रत्यपसरन्ति सैनिका मे। (तारस्वरमाश्रित्य) भो भोः! सागरकल्पा मोगलप्रवीराः!

पाठानसैनिक-करीश्वर-दम्भ-कुम्भ-
विद्रावण-द्रढिम-कीर्त्तित-कीर्त्ति-सिंहाः।
वङ्गीयभूप-मृगपोत-भयाङ्कवन्तः
कस्मात् पलाय्य निपतन्ति कलङ्कसिन्धौ ॥१७॥

आः कथं नाकर्णयन्त्यपि। धिक् पलायनं जाल्मानाम्।

नेपथ्ये पूर्वतः। हर! हर! हर! महादेव!।

नवावः। (सोद्वेगम्) कथमासन्न एव विधर्म्मिणां विजयोल्लासः।

पुनर्नेपथ्ये। भो भोः! प्रतापसहाया वङ्गीयप्रवीराः—

भीरुः कापुरुषः प्रभिन्नहृदयः कुण्ठः परस्रोद्विषः
शान्तो धूर्त्ततमश्च वङ्गजजनो निन्देति या वः क्षितौ।
तामद्य प्रविधूय सम्मुखरणे वीर्य्योद्धतान् मोगलान्
अत्याचारपरान् विजित्य सुचिरं कीर्त्तिः स्वगाधीयताम् ॥१८॥

नवाबः । (श्रुत्वा विलोक्य च) तत् कतमोऽयमोजस्विनीभिर्भाषाभिः समुत्तेजयन्नात्मसैनिकानित एवाभिधावति । आं ज्ञातम्—अयमसौ जातक्रोधो बद्धवैरः शङ्करः । (विचिन्त्य) हा धिक् ! अत्रावस्थानमयुक्तमिदानीम् । (सहसा मञ्चादवतीर्य्य सनिर्वेदम्) अद्य फलितं विषमयफलं खल्वनवसरे विलासस्य । अद्य परिणामः प्रमादपरिणामः, अद्यानुभूतश्चानौचित्यं सपत्नेषु तुच्छताज्ञानस्य । अहोवत !

जयाम्बुशुचि सत्कीर्त्तिमालामद्य दिधीषुणा ।
एत्य ग्लानिकृशानुत्यः कलङ्काङ्गारको धृतः ॥१८॥

नेपथ्ये । जयो महाराजप्रतापादित्यजयः ।

(पूर्वनर्त्तक्यः । सहसा निष्क्रामन्ति ।)

नवाबः । कः कोऽत्र भोः ! कृपाणः कृपाणः ।

प्रविश्य रक्षिसैन्यः । (तरवारिमर्पयति ।)

तरवारिं गृहीत्वा नवाबः । तत् किमेकाकी सम्प्रहरन्नेव कथायामवशिष्य मोचयामि कलङ्कादात्मानम् । (विचिन्त्य) न खलु न खलु । अवश्यमेव जेष्यामि विधर्म्मिणः पापान् । तदितः स्वसैन्यानेवानुसरामि । (इति द्रुतमपसर्त्तुमुपक्रमते ।)

सहसा प्रविश्य शङ्कर । आः पाषण्ड ! क्व यासि ? । (इति शूलमुत्तोलयति ।)

झटिति प्रविश्य प्रताप । वयस्य ! वयस्य ! न हन्तव्यो न हन्तव्यः । नवाबः खल्वयम् । (इति शङ्करस्य करं धत्ते ।)

शङ्कर । (उत्तोलितशूल एव) वयस्य ! जहीहि निर्बन्धम् ।

शश्वद्धर्म्मं क्षपयतितरां यः प्रजानां मृदूनां
आक्रन्दन्तीर्हरति शरणं प्रत्यहं यः परस्त्रीः ।
पापात्मानं घृणितयवनं तं निहत्याद्य सद्यः
वक्षःशैलं चिरमिह भुवस्तीव्रमुत्तोलयामि ॥२०॥

नवावः । (आत्मगतम्) असह्यम् असह्यम् । मृत्युरितः शतधा श्रेयान् ।

उद्वेगकातरधियश्चकितस्य दूरात्
खद्योतभासनदृशो विषयोऽस्मि यस्य ।
तस्यैव सन्निधितिरस्कृतिधिक्कृतस्य
धिग् जीवितं धिगपि मेऽद्य जिजीविषाञ्च ॥२१॥

(असिं निष्काशयन् प्रकाशम्) आः पापिष्ठ ! विधर्म्मि-कुलकलङ्क !

विद्रावितद्विपकुलो नियतेर्नियोगात्
पञ्चाननः पतति यद्यपि वागुरायाम् ।
स्पर्द्धां तथापि सहते हरिणस्य किंस्वित्
आहत्य प्रत्युत करेण करोत्यजीवम् ॥२२॥

शङ्कर । (शूलमुद्यम्य) आः पाप ! दुरात्मन् ! ।

नवावः । (तरवारिमुत्तोल्य) आः पाप ! दुरात्मन् ! ।

ससम्भ्रमं प्रविश्य धीरेन्द्रदत्तः । (सतरवारिं नवावकर-माकृष्य) पापिष्ठ ! स्मर तावदात्मनोऽत्याचारम् ।

शङ्कर । श्रीमन्महाराज ! प्रतापादित्य ! परिहर-त्वमिदानीम् ।

नवाब: । (प्रतापादित्यमवलोक्य किरीटमवतारयन् तत्-पादमूले रक्षति ।)

नूतना युवतय: । हा ताद ! हा अम्ब ! हा कच्चाअणि ! । (स)

शङ्कर । (युवतीरालोक्य) वयस्य ! दृष्टात्रापि कुलस्त्रीणा-मवस्था ? । आ: प्रज्वलति हृदये दावाग्निः ।

प्रताप । नवाव ! वङ्गेश्वर ! किमेतत् ?

वितरसि गुरुदण्डं स्वल्पदोषेण दीने
हरसि परकलत्रं दण्डदानच्छलेन ।
स्मरसि सततमेव त्वन्तु वङ्गाधिनाथं
स्मरसि न जगदीश: कश्चिदस्तोति किञ्चित् ॥२३॥

भवतु । अद्य त्वमस्माभिर्वन्दीकृत: संवृत्त: ।

धीरेन्द्रादय: । (नवावमशस्त्रं कुर्वन्ति, एकदेशलीनं तोरावस्थावध्नान्ति ।)

प्रताप । धीरेन्द्र ! ब्रूहि सेनापतिं सूर्य्यकान्तम् ।

आदाय राजपुतवङ्गचमूमिहैव
गत्वा विलुण्ठ्य पुनरेतु च राजधानीम् ।

शङ्कर । अत्रैव घोषयतु चातिशुभे मुहूर्त्ते
स्वाधीनतां नवयशोरपतेर्नवीनाम् ॥२४॥

प्रताप । संग्रामास्पदच्छेदं संग्रामपुरं नाम प्रथितमस्तु ।

इति निष्क्रान्ता: सर्वे ।

इति वङ्गेशविजयो नाम पञ्चमोऽङ्क: ।

(स) हा तात ! हा अम्ब ! हा कात्यायनि ! ।

षष्ठोऽङ्कः ।

—:००:—

अथ प्रविशति महापीठमन्दिराङ्गने वसन्तरायोपाध्यायो वर्षीयान् श्रीकृष्णतर्कपञ्चाननः ।

श्रीकृष्ण । (देवीं प्रणम्य) अम्ब ! वैराजप्रसूते ! जगद्धात्रि ! त्वया हि—

नि:संख्याचल-साल-सागर-सरित्-प्राण्युच्चयोच्चावचं
ब्रह्माण्डं बहुकोटि-लोमविवरेष्वाधीयते सर्वदा ।
किं तेभ्योऽपि महाणु मे ननु मनः सम्भाव्यते भारवत्
येनास्यार्पणमात्रमेव चरणप्रान्तात् परित्यज्यते ॥१॥

हन्त ! अद्य कियतः परिवत्सरान् यावद्ब्रवोमि यत्—इदानोन्तनवानप्रस्थाश्रममिदानीं वाराणसीमाश्रयामि । किन्तु तत्र प्रतिबध्नाति ब्रवीति च राजा विक्रमादित्यो वसन्तरायश्च—"प्रायेण समनवयसो वयं सहैव गमिष्याम" इति । अहोवत ! यदित्थं बलवतीमाशां पुष्णन्नेव विक्रमादित्यः सकलगुणनिधिरिहस्थ एव परलोकं गतः । अत एव महामनस्विभिराम्नायते नाम—

"श्वः कार्य्यमद्य कर्त्तव्यं पूर्वाह्ने चापराह्निकम् ।
नहि प्रतीक्षते मृत्युः कृतमस्य नवा कृतम् ॥"

इदमेव तावद्विधातृविहितं वैचित्र्यम् । यत्, इत्थं जानन्नपि

जनो न जानाति, पश्यन्नपि नात्मनि प्रत्येति, शृण्वन्नपि प्रलापमिव विस्मरति। इदं पुनरवश्यमालोचनीयं मर्त्यानाम्—

धन-मान-जन-प्रजीवनं
सकलं भावि हि संशयाकुलम्।
मरणन्तु नितान्तनिश्चितं
नहि जन्मी मरणाद्विमुच्यते ॥२॥

(विलोक्य) अये! माधवः प्राप्तः।

ततः प्रविशति पुस्तकमादाय प्रतापादित्योपाध्यायः
प्रौढ़वया माधवचन्द्रः अविलम्बसरस्वती।

माधव। (देवतां प्रणम्य सप्रणामम्) आर्य्य! अभिवादये।

श्रीकृष्ण। (प्रत्यभिवाद्य) चिरं जीवन् यशस्वी भूयाः। अथ सन्दिहानः पृच्छामि—राज्यं महाराजपदञ्च प्रदाय दिल्लीश्वरेण पुरस्कृते कुमारे पुनर्वङ्गेश्वरमवर्जित्ये प्राप्ते स्थविरराजयोर्युगपदेव विषादानन्दाकुलं हृदयमासीदिति श्रूयते। तत् किमवितथम्?।

माधव। अलीकं खल्विदमाकर्णितमार्य्येण।

श्रीकृष्ण। कुमारद्वेषिणा भवानन्देनाभिहितमिति मयापि न सर्वथा प्रतीतम्। किन्तु पुरश्चरणप्रवृत्तो गङ्गातीरमध्यासीति पृच्छामि—सर्वप्रकाराभ्युदयेन प्राप्ते कुमारे कस्तत्र वृत्तान्तः सर्वेषाम्?।

माधव। प्राक्प्रवृत्तो महोत्सवः। अथ तु सन्ततमेव

कुमारम् अप्रतिभमिव कृतमहापराधमिव पातकावस्कन्दितमिव लज्जितमिव भीतमिव स्वात्मनि लीयमानमिव च विचरन्त-मवलोक्य कदाचित् ज्यायसः सन्निहितः कनीयान् राजा निदान-मनुयुञ्जानः शङ्कराद्दिल्लीशदत्तपुरस्कारवृत्तान्तमाकर्ण्य महानन्द-निर्भरो निर्भरमाश्लिष्य कुमारमभिहितवान्—"वत्स ! चिरायुषन् !

अस्माभिरागतजरैर्यदहो विधेयं
दिल्लीश्वरेण विहितं हितकामिना तत् ।
योग्यश्च योग्यतमदेशविभूषणस्य
तत् किं महामदपदेऽत्र विषादशङ्का ॥३॥

तत् सर्वथा वयमिदमनुजानीमहे" इति ।

श्रोकृष्ण । साधु साधु, सत्यकालोचितैव चित्तवृत्ति-र्वसन्तरायस्य ।

माधव । तदानीमिव च महामनस्वी ज्येष्ठो राजा ज्ञाति-विवादमाशङ्क्य दशानकं प्रतापस्य षड़ानकञ्च कनीयसो राज्ञ इत्थं किल स्वार्जितमिति विभेजे यशाहरराज्यम् । ससन्तोष-मुररीकृतञ्चोभयवर्गेण ।

श्रोकृष्ण । (सानन्दोल्लासम्) ईदृशो किल वृत्तान्ते तत्र-भवन्तः सर्व एव प्रशस्यतमाः ।

माधव । कतिपयैरेव च दिवसैः प्रतापसेनापतिः सूर्य्यकान्तो वङ्गराजधानीं विजित्य विशालवसुराशिमासादयन् समन्ताच्चाघोषयन् स्वाधीनतां प्रतापस्य विजयिनीं राजपुत-वङ्गीयसेनामादाय यशोरमागतः ।

श्रीकृष्ण। (सविस्मयम्) राजपुतमोगलसेना तु दिल्लीशेन दत्ता, किन्तु कुतो नामेदृग्वङ्गीयसेनासंग्रहः प्रतापस्य ?।

माधव। स्वभावत एव मोगलद्वेषिणः पाठानाः, अत्याचार-जर्ज्जरिताश्च हिन्दुसन्तानाः प्रागेव निभृतशिक्षिता मदनमल्लेन तु संगृह्य शङ्करायोपहृताः। येषाञ्च षट्सहस्राणां भुजबलेन शङ्करो विजितवान् नवावसेनायाः पूर्व्वभागम्।

श्रीकृष्ण। इदानीं निर्णीतवस्तुतत्त्वं स्वस्थमन्तःकरणम्। तथा च— भारतेश्वरबलं सुदुर्ज्जयं
बहुवैरमपरञ्च वङ्गजम्।
वङ्गनेतुरधिका विलासिनी
दुर्ज्जयापि सुजयाभवच्चमूः ॥४॥

माधव। विभक्ते च राज्ये राजधानीविभागोऽपि न्याय्य इति प्राचीनमिदं यशोरं प्राचीनाय कनीयसे परिकल्प्य अर्व्वाचीनाय कुमाराय धूमघाटे नवनगरं निर्म्मातुं नवावञ्च विमोक्तुमादिदेश राजा ज्यायान्। कुमारेण तूभयमपि सम्पादितम्।

श्रीकृष्ण। इयमपि साधु कल्पितं वर्षीयसा।

माधव। इतस्तु प्रतापकन्या विन्दुमती प्राप्तकालेति चन्द्रद्वीपप्रभवे रामचन्द्राय प्रतिपादिता। किन्तु विषम-मासीत्तत्र घटनान्तरम्।

श्रीकृष्ण। (साशङ्कम्) किं नाम तत् ?।

माधव। भवानन्दगोविन्दप्रमुखैर्निभृतवादेन परित्रासितः

किल सरलचेता रामचन्द्रः, यथा—"धूर्त्तः खलु प्रतापः प्रदाय कन्यामादास्यति ते प्राणहरणेन राज्य"मिति । अथासा-निवृत्त एव विवाहमहोत्सवे बालतया प्रतीतवृत्तान्तस्यायुष्मतः खलूदयादित्यस्य साहायकेनालोकधारिवेशमादाय निभृतनिर्गतः शतघ्नीघोषेण आघोषयन्नात्मनोऽपसरणं प्रचुरतरकर्णधारया तरण्या त्वरितमपासरत् ।

श्रीकृष्ण । (सासूयम्) तत् किमेनममात्यापसदं नापसारयति कुमारः ? ।

माधव । स पुनरिदानीं कपटपटुः कनीयसी राज्ञः सचिवः संवृत्तः । श्रूयते किल सोऽपि राजा कुमाराय नितरा-मसूयतीति ।

श्रीकृष्ण । सम्भाव्यते खल्वेतत् । कुतः—

साधुः सन्नपि भूपालो मन्त्रिदोषेण दूष्यति ।
मन्दं वर्षफलं दत्ते मन्दमन्त्री हि गोष्पतिः ॥५॥

तन्मन्ये—दुरात्मनो भवानन्दादेव भावी कुमारस्य मानक्षय इति । तथापीदानीमस्माकं भवादपसरणकाले भवानन्दाप-सारणप्रयासो न श्रेयान् । यातु । तदभिधीयतामवशेषः ।

माधव । (सनिश्वासम्) अवशेषस्तु कथावशेषः संवृत्तो राजा विक्रमादित्यः कुमारस्य राज्याभिषेकमुपक्रममाण एव ।

श्रीकृष्ण । हन्तैष पुनर्विषादसम्पातः सम्पततैव परिश्रुतः । भवतु । सम्प्रति कः खलु वृत्तान्तः पौराणाम् ? ।

माधव । स्वरारूढेन राज्ञा प्रक्रान्तमभिषेकमुपपादयितु-

मिदानीमुदयुङ्क्त नूतनमन्त्री शङ्करः । कुमारेण चासौ यथाकालं कृतसकलकर्म्मणानुमोदितः । तद्भवन्तमुपगतमुपलभ्य तदाचार्य्यतासम्मतिमादातुमागतोऽस्मि ।

श्रीकृष्ण । (माधवहस्तगतं पुस्तकं निर्द्दिश्य) तत् किमियं पद्धतिरभिषेकस्य ? ।

माधव । अद्वैतसिद्धिः किलेयम् ।

श्रीकृष्ण । तत् कस्य कृतिनः कृतिरेषा ? ।

माधव । कनिष्ठतातश्रीमन्मधुसूदनसरस्वतीपादानाम् ।

श्रीकृष्ण । अथ स भगवान् भवतः कनिष्ठतातः ? ।

माधव । अथकिम् ।

श्रीकृष्ण । अहो ! रत्नाकरभूतं वः कुलम् ।

माधव । रत्नेनैव रत्नाकरः परिचीयते नाम ।

श्रीकृष्ण । तत् कुत इदमासादितं पुस्तकम् ? ।

माधव । दिल्लीराजधान्यामवस्थानकाले कुमारमन्त्रिणः शङ्करादस्मदुदन्तान्तमुपलभ्य तदीयहस्ते विन्यस्तमेतत्तत्रभवता परिप्रेक्षणाय मादृशानाम् ।

श्रीकृष्ण । कथमसौ भगवानासज्यति राजधान्याम् ? ।

माधव । श्रुतं हि शङ्करात्—"परिषत्प्रस्तावादुपश्रुतगुणग्रामेण भारतस्वामिना समानीतः कतिपयैरेव च दिवसैः पुनर्वदरीतपोवनं गतः । मुह्यन्मनसा च दिल्लीश्वरेण परिषदि प्रख्यापितं किलेदम्—

"वेत्ति पारं सरस्वत्याः मधुसूदनसरस्वती ।
मधुसूदनसरस्वत्याः पारं वेत्ति सरस्वती ॥" इति ।

श्रीकृष्ण । अहो ! भूतार्थमुद्घोषितं दिल्लीश्वरेण । भवतु, एतत् खल्ववसरे द्रष्टव्यम् । तदेहि साम्प्रतिकमेव सम्पादयामः ।

(इति निष्क्रान्तौ ।)

विष्कम्भकः ।

—०—

अथ प्रविशति धूमघाटनगर-राजपथोपान्तवर्त्तिनि चतुष्पाठीभवनाङ्गने माधवान्तेवासी सभृत्यो बलरामः सम्भवतस्य सतीर्थवर्गः ।

बल । केशव ! गुरुणा तावदादिष्टोऽस्मि—"वत्स ! अद्य किल कुमाराभिषेकमहोत्सवे नानादिगन्तागतान् महामनीषिणः सभाजयितुं प्रत्येकमावासो मया पर्य्यटितव्यः, तस्त्वमिदानीमनाहूतोपस्थितानां स्वाहूतानां शास्त्रज्ञानाञ्च विप्राणां तारतम्यानुसारेण मुद्राविनिर्दाङ्कितं प्रतिपादय पत्रम्" इति ।

केशव । जुज्जदि । जेण हि तुमं दाव सव्वाइं सत्ताइं पढ़िअ तक्कभूसणोऽसि, अवि अ उवज्झाअस्स अग्गअ भादुणो पत्तासि । (क)

(क) युज्यते । येन हि त्वं तावत् सर्वाणि शास्त्राणि पठित्वा तर्कभूषणोऽसि, अपि च उपाध्यायस्य अग्रजभ्रातुर्नप्तासि ।

बल। (भृत्यं प्रति) अये! आस्तीर्य्यतामत्रासनम्, समाक्रियताञ्च सनस्यं सोपकरणञ्च ताम्रकूटम्।

भृत्यः। (यथादिष्टमनुतिष्ठति।)

बल। (दौवारिकं प्रति) पाण्डेय! आहूयन्तामागन्तुकाः।

दौवा। तह। (इति निष्क्रम्य खाह्नतत्रयेण सह पुनः प्रविश्य) एत्थ भावो. ता उपसप्पन्तु अज्जा। (ख)

खाह्नताः। ब्राह्मणेभ्यो नमः।

बल। (प्रतिप्रणम्य) इदमासनम्, अत्रोपविश्यताम्।

खाह्नताः। (नात्यन्तोपविशन्ति।)

बल। (प्रथमं प्रति) तत् किं नाम शास्त्रमभिनिविष्टो भवान्?।

प्र-र। तिष्ठ महाशय! किञ्चित्। (भृत्यं प्रति) अये! अस्ति किं ताम्रकूटव्यवस्था?।

केशव। अवि सेवदि भवं ताम्मउडं?। (ग)

प्र-र। नक्तन्दिवं नक्तन्दिवम्।

केशव। तह्निं महन्तो ज्जेव भवं ताम्मउडस्स उवासओ। (घ)

प्र-र। किमुच्यते? ताम्रकूटं हि नाम सर्वभूते विराजमानो महाविष्णुः।

(ख) तथा। अत्र भावः, तदुपसर्पन्तु आर्य्याः।

(ग) अपि सेवते भवान् ताम्रकूटम्?।

(घ) तर्हि महानेव भवान् ताम्रकूटस्य उपासकः।

केशव। (विहस्य) कथं विश्र!। (ङ)

प्र-र। किं न पश्यसि?।

नारीणां गुड़िका विखण्डितदलं दोक्ता च सक्ता पृथक्
नस्यं भूरिमनीषिणाञ्च चुरटं चञ्चद्विलासात्मनाम्।
हुक्का-गुड़्गुड़िकाल्बला-विलसनैः शेषान् समालम्बते
चक्रं दर्शयते च्युतं वितनुते मुक्तिं प्रदत्ते परम्॥६॥

सर्वे। (हसन्ति।)

केशव। (सहासम्) ता कस्स अवदारस्स उवासओ भवं?। (च)

प्र-र। अये! श्रूयतां तावत्।

आलबालाम्बुचरस्य फुत्कृतिकरस्तोयान्तरे शब्दनः
वक्षःक्षोभकरा महाध्वरगतो धूमध्वजो भूभृताम्।
क्षेत्रग्रामवनो हलास्त्रसुगतः प्रान्ते च कल्किस्तथा
एते श्रीहरिताम्रकूटविधृताः कार्य्यावतारा दश॥७॥

तेन हि—एकाश्रयेऽपरः कुप्येदिति सर्वानुपास्महे।

अणीयानपि देवांशः क्षयं शंसति मांसलः॥८॥

सर्वे। (सविस्मयं हसन्ति।)

बल। (विहस्य) साधु, महाकविः किल भवान्। (भृत्यं प्रति) अये ताम्रकूटं तावद्दीयताम्। (द्वितीयं रवाहृतं प्रति) तत् किं जानाति भवान्?।

(ङ) कथमिव?।

(च) तत् कस्य अवतारस्य उपासको भवान्?।

द्वि-र। काव्यं जानामि, सप्तशतीं जानामि।

बल। तन्माघमपि जानाति ?।

द्वि-र। अये! माघं को न जानाति, यत्र किल वङ्गेष्वपि महत् शीतम्।

बल। अहो! शिशुपालवधज्ञानं पृष्टोऽसि।

द्वि-र। नाहमासं युधिष्ठिरराजसूयसभासभ्यः, येन शिशुपालवधज्ञानं पृच्छनीयः स्याम्।

बल। भवतु। श्रीहर्षकृतं किञ्चित्?।

द्वि-र। आ जन्मनः श्रीहर्षगन्धोऽपि नास्ति, तदाभ्यां किं क्रियेत किं वा जानामि।

बल। अस्तु। बाणकृतं तर्हि ?।

द्वि-र। (चिह्नं दर्शयित्वा) नन्वेतत् पश्य।

केशव। किण्णेदं। (क)

द्वि-र। कस्यचिद्बाणस्य क्षतचिह्नम्।

बल। (विहस्य) अस्ति कालिदाससम्पर्कः?।

द्वि-र। अस्ति महान् सम्पर्कः, स हि मे पत्नीभ्राता।

सर्वे। (प्रहसन्ति।)

बल। तदुदाक्रियतां तावद्भवभूतिकाव्यस्य किञ्चित्, सप्तशतीस्तोत्रस्य ऋष्यादिकमेकं वा।

द्वि-र। हन्त! कुतोऽपि नाव्याहतिः। भवतु। समयसंक्षेपात् युगपदुभयमेवोदाक्रियते। श्रूयताम्—

(क) किमिदम्।

"उत्तरचरितस्य भवभूति ऋषिः, सीता देवता, नानाविधं छन्दः, समासप्रयोगे भीमा शक्तिः, कवियशो बीजम्, सम्मेलनं तत्त्वम्, परिषत्प्रीत्यर्थमभिनये विनियोग.।"

सर्वे। (साश्चर्य्यं हसन्ति।)

बल। (विहस्य) साधु, गभीरा समालोचनेयम्। (तृतीयं प्रति) तत् किं विज्ञायते भवता ?।

तृ-र। स्तवः स्तोत्रं नुतिः स्तुतिः।

केशव। (सहासम्) अह्मो! महन्तो ज्जेव अमरकोसोसि। (ज)

तृ-र। मन्ये, त्वं खलु तदधिक एवासि।

सर्वे। (प्रहसन्ति।)

बल। (सहासम्) तदुदाह्रियतामेकं स्तोत्रम्।

तृ-र। इदं हि मे श्यामास्तोत्रम्—

"ताम्बूलं मध्यमान्तः खरपरिरहितं चूर्णपूगेन युक्तम्।"

सर्वे। (विशेषेण हसन्ति।)

केशव। (प्रहस्य) साहु रे साहु। ता तोत्तं परिहरिअ वस्सेहि दाव अप्पणो सामां। (झ)

तृ-र। आः सावशेषं न श्रुतम्। भवतु। श्रूयतां ध्यानमुखेन मे श्यामावर्णनम्।

(ज) अहो! महानेव अमरकोषोऽसि।

(झ) साधु रे साधु। तत् स्तोत्रं परिहृत्य वर्णय तावदात्मनः श्यामाम्।

"देवीमम्बां सुतानां चितिधरवदनां भ्राष्ट्रकान्तिं जघन्यां खट्वारूढ़ामुदारामरुगिततनयनां भवदा वग् वगन्तोम्।"

सर्वे। (प्रहसन्ति।)

बल। (प्रहस्य) वेद्मि किल भवन्तमृत्विग्वरं श्यामापतिम्।

ह-र। न खलु न खलु।

"वाग्धीनां नयनोत्पलार्चिततनुं गौं गौं कृतं विद्धि माम्।"

सर्वे। (अट्टहास्यं कुर्वन्ति।)

बल। (प्रहस्य) भवतु। कृतमिदानीमपरपरिचयश्रमेण। (इति विशेषेण मुद्रयित्वा पत्रत्रयं ददाति।)

सर्वे स्वाहृताः। (सानन्दं गृहीत्वा) अहो! निपुणदर्शिता वः। तत् स्वस्त्यस्तु। साधयामस्तावत्। (इति निष्क्रान्ताः।)

बल। (दौवारिकं प्रति) अये! आहूयतामिदानीमेकैकः।

दौवा। तह। [इति निष्क्रान्तः।] [ञ]

केशव। ता कधं एदे स्वाहृदकवडेण पच्छस्साओ!। [ट]

बल। तर्कयामि—पत्रिसार्थेनापत्रमुपस्थानमपमानाय मन्यमाना स्वाहृतच्छद्मनोपस्थिताः।

केशव। ता किस्स, क्खु एरिसो वावारो किदो?। (ठ)

(ञ) तथा। (ट) तत् कथमेते स्वाहृतकपटेन प्रच्छन्नाः?।
(ठ) तत् किन्नु खलु ईदृशो व्यापारः कृतः?।

बल। अये! मनीषिणो हि कदाचित् परान्तेवासिभिः सरसं व्यवहरन्ति।

दौवारिकेण सह प्रविश्य वैयाकरणः। नमो विप्रेभ्यः।

बल। [सप्रतिप्रणामम्] आर्य्य! इदमासनम्, उपविश्यताम्।

वैया। [नात्यन्तोपविशति।]

बल। तत् किं नाम शास्त्रं परिशीलयति भवान्?।

वैया। शब्दशास्त्रम्।

बल। किञ्चित्तत्र परिचयप्रयोजनम्।

वैया। पश्यन्त एव परिचिन्वन्तु भावाः।

सन्धिः स्वाङ्गेष्वनशनपतत्पित्तकुक्षौ च शब्दः
धातुर्दृष्टेरुपरि चरितस्तद्धितं चित्तनिष्ठम्।
सत्सम्बन्धं सुपट् करणं कारकं मे, समासो
राजत्यास्ये परमसुखकृन्मात्रमस्मिन्नदृष्टम् ॥८॥

बल। अहो! गभीरा दारिद्र्यनिर्वेदव्यक्तिः। साधु, सत्कविः किल भवान्। [इति मुद्रयित्वा पत्रं ददाति।]

वैया। [पत्रमादाय निष्क्रान्तः।]

प्रविश्यालङ्कारिकः। स्वस्योपमानं स्वयमेव सम्भवन्
अनन्वयस्यान्वयतो निदर्शनम्।
भोगेन हीनोऽपि सदैव भोगवान्
विरोधलक्ष्यश्च शिवः शिवोऽस्तु वः ॥१०॥

बल । [आकर्ण्य सानन्दम्] नन्वासनमलङ्क्रियता-मालङ्कारिकेण ।

आल । [नात्येनोपविशति ।]

बल । तत् कीदृशे पत्रे भवतामभिलाषः ? ।

आल । ननु विशेष एव ।

बल । कथं प्राक् परिचयाद्विशेषोक्तिः ? ।

आल । येन सत्यपि योग्यत्वे विशेषस्त्वेन्न लभ्यते ।
सति हेतौ फलाभावे विशेषोक्तिर्हि युज्यते ॥११॥

बल । [सहर्षम्] मयापीदं वक्तव्यं भवति ।
अयोग्येन विशेषे तु लब्धेऽन्योऽपि विभावयेत् ।
कार्य्योत्पत्तौ विना हेतुं भवत्येव विभावना ॥१२॥

आल । साधु, भवतो विद्याप्रत्ययादिदानीं विशेषे का कथा, अलब्धेऽपि पत्रमात्रे नास्त्यणीयानपि विषादः ।

बल । तद्गृह्यतामिदम् । [इति विशेषाङ्कितं पत्रमर्पयति ।]

आल । [गृहीत्वा निष्क्रान्तः ।]

प्रविश्य दार्शनिकः ।

सांख्यस्य प्रकृतिप्रभिन्नपुरुषः पातञ्जलस्येश्वरः
न्यायस्याष्टगुणेश्वरः कृतिनिधिर्वैशेषिकस्यापि सः ।
मीमांसाद्वितये मुनिद्वयकृते वाक्यात्मकस्त्वाद्वयं
मन्त्रो ब्रह्म, यथा तथास्तु भगवान् भूयात् स वः श्रेयसे ॥१३॥

बल । तदस्तित्वे कुतो निश्चयः ? ।

दाश। "यं कारवोऽपि विश्वकर्म्मेत्युपासते तस्मिन्नेव गोत्र-प्रवर-चरण-कुलधर्म्मादिवदासंसारं सुप्रसिद्धानुभवे भगवति भवे सन्देह एव कुतः।"

बल। [सम्मतिनाटितकेन] ब्रूवन्ति च भामतीकाराः— "स्फुटतराहमनुभवगम्य आत्मा संशयाभावात्" इति।

दाश। साधु, अधिगतसकलशास्त्रस्य शिशोरपि ते शोभते प्रश्निकपदम्।

बल। [विशेषाङ्कितं पत्रमपयति।]

दाश। [आदाय निष्क्रान्तः।]

प्रविश्य स्मार्त्तः।

आत्मनो जननाशौचं शावाशौचन्तु विद्विषाम्।
प्रायश्चित्तञ्च सन्दिग्ध-पापेष्वस्तु तव ध्रुवम् ॥१४॥

केशव। [सहासकौतुकम्]

विप्पस्सामिअगोहच्चा तुह होदु कहिं वि ण।
चाण्डालास्सं सदा खाहि तत्तकिच्छपओअणं ॥१५॥ [ङ]

स्मार्त्तः। (सरोषम्) धिक् प्रहासम्।

आवश्यकं जननतो मरणान्तिमं यत्
शास्त्रेण तेन तुलना क्षणतृप्तिदैः का।
बाला हि मातरमथान्नमपास्य नित्यं
मातृष्वसारमपि पिष्टकमाद्रियन्ते ॥१६॥

(ङ) विप्रस्वामिकगोहत्या तव भवतु कस्मिन्नपि न।
चाण्डालान्नं सदा खाद तप्तकृच्छ्रप्रयोजनम्॥

बल। आर्य्य! मर्षयतु बालिशतां बालस्य।

श्रुतिप्रसूता मुनिसंगृहीता
युक्तिं सदाचारमथाश्रयन्ती।
कर्म्माश्रमाणां विदधाति या हि
को मातृवन्नाद्रियते स्मृतिं ताम् ॥१९॥

(इति विशेषाङ्कितं पत्रं ददाति।)

स्मार्त्तः। (गृहीत्वा निष्क्रान्तः।)

नेपथ्ये। (दुन्दुभिध्वनिजयकोलाहलानन्तरम्।)

स्नातो यात्यभिरूप-रूप-विनमन्मारः कुमारः क्रमात्
संसत्सद्मनि पद्मिनीं वनमहापुत्रीव पद्मां वहन्।
शंसन्तीव यशांसि लाजमिषतः पौराङ्गनाः प्राङ्गणे
माद्यन्नद्य सदोयमैर्जयजयध्वानैर्जनो धावति ॥१८॥

बल। (आकर्ण्य) पाण्डेय! पश्य तावत्, कति सन्त्यन्ये पण्डिता इति।

दौवा। भाव! दीसदि ण क्खु को वि अवरो पण्डिदो। घरन्तरन्तु केवलं रवाहूदेहिं वह्मणेहिं कलअलेण आउलीकरीअदि। (ढ)

केशव। जुज्जदि। ण क्खु पइदपण्डिदाओ बहुदराओ उवचिट्ठन्ति। (ण)

(ढ) भाव! दृश्यते न खलु कोऽपि अपरः पण्डितः। गृहान्तरन्तु केवलं रवाहूतैर्ब्राह्मणैः कलकलेनाकुलीक्रियते।

(ण) युज्यते। न खलु प्रकृतपण्डिता बहुतरा उपतिष्ठन्ति।

बल। तदेहि। रवाङ्कतान् मुखतः समामन्त्र कुमार-पार्श्वगता भवामः।

केशव। वअस्स! सुणीअदि दाव, अज्जकुमारो कप्पतरू भविस्सदि त्ति, ता जइ कोवि सग्गरज्जं सव्वरज्जं वा पत्थेदि। (त)

बल। अये! असाध्यमनर्थं वा नार्थयन्त्यर्थयितारः। (इति सतीर्थदौवारिकादिसहितो निष्क्रान्तो बलरामः।)

ततः पटान्तरे परिवर्त्तिते प्रविशति राजसभायां
सिंहासनासीनः सपत्नीकः प्रतापादित्यः, दक्षिणवामतो
माधवशङ्करी, विभवतश्च सदस्या याचकाश्च।

वैतालिका गायन्ति।

कालि! करुणामयि! पाहि प्रतापम्।
भारतवीरसमाजे देहि प्रतापम्।
सारदे! वरदे! गतिदे! मतिदे!
धनदे! शुभदे! जहि त्रितापम्।
सेवकशरणं मङ्गलकरणम्
चेतसि चरणं धेहि दुरापम्।

प्रथमवैतालिकः।

किरति किरणमाली मात्रमत्रान्धकारं
वितरति सुरशाखी केवलं प्रार्थितार्थम्।

(त) वयस्य! श्रूयते तावत्, अद्य कुमारः कल्पतरुर्भविष्यतीति। तद्यदि कोऽपि स्वर्गराज्यं सर्वराज्यं वा प्रार्थयति।

विदलितरिपुपक्षः सन् पुनः कल्पवृक्षः
जयति युगपदेकस्तौ यशोरेष एषः ॥१८॥

द्वितीयवैतालिकः।

सकलसुसहतापः पूर्वतः पूर्वमुद्यन्
सपदि निहितपादो भूभृतां मस्तकेषु।
जगदिदमधिकुर्वन् लीयतेऽर्कः प्रतीच्यां
परमुदयतु तस्यामप्ययन्तु क्रमेण ॥२०॥

शङ्कर। (उत्थाय) भो भो ब्राह्मणकायस्थप्रमुखा नानादिगन्तागताः सामाजिकाः! एष हि श्रीमन्महाराजः प्रतापादित्यः—

दृष्ट्वा दुःखान्यधिगतदयावीरभावः प्रजानां
जित्वा वङ्गेश्वरमतिखरं युद्धवीरः परं सन्।
पार्थो ज्यायानिव विनयवान् धर्म्मवीरावतारः
ख्यातः कल्पद्रुम इति पुनर्दानवीरोऽप्यजातः ॥२१॥

सर्वे। (जयध्वनिपुरःसरं करतालिभिः सविस्मयानन्दमनुमोदन्ते।)

शङ्कर। तन्मुहूर्त्तं यावत् यथाकाममर्थयितुमर्हन्त्यर्थयितारः।

माधव। (उत्थाय) इदं पुनरर्थिमात्रस्य प्राक् पर्य्यालोचनीयम्; यथा, दानं हि नाम खल्वमूलं शक्तिसाध्यञ्च। तेन हि—

सत्ताहीनं भावि भूतञ्च वस्तु
त्यक्तुं शक्तो नैव कल्पद्रुमोऽपि।

देयं दद्यादर्थ येन्नार्थ्यमर्थी
युज्येतास्मिन् कस्यचिन्नापदेशः ॥२२॥

सर्वे। (इदमपि करतालिभिरनुमोदन्ते।)

(ततः प्रार्थयितारा यथाभिलाषं भूमिवृत्त्यादिकं प्रार्थयन्ति।)

प्रताप। (यथासम्भवमुत्सृज्य ददाति।)

दुर्गापदनामा कश्चिद्‌ब्राह्मणः। राजन्! देहि मे स्वर्णमुद्राम्।

प्रताप। (उत्सर्गव्यापृततया नयनेङ्गितेन दातुं महिषीमनुमोदते।)

पद्मा। (स्वर्णमुद्राभाजनादेकामुत्तोल्य ब्राह्मणहस्ते ददाति।)

(मुद्रा तु ब्राह्मणहस्तच्युता अधाभाजनस्थमुद्राराशौ पतति।)

पद्मा। (पुनरुत्तोल्य दातुमारभते।)

प्रताप। (विलोक्य) देवि! ननु किं क्रियते?।

पद्मा। भाअणपड़िदं तं उणा अप्पेमि। (थ)

प्रताप। अपि प्रत्यभिज्ञायते सैवेयमिति।

पद्मा। अज्जउत्त! अप्पणो रासिम्मि पड़िदं धस्सं विअ कधं पच्चहिजाणोअदि तं ज्जेव एमं सुवस्सं त्ति। (द)

(थ) भाजनपतितां तां पुनरर्पयामि।

(द) आर्य्यपुत्र! आत्मनो राशौ पतितं धान्यमिव कथं प्रत्यभिज्ञायते तदेवेदं सुवर्णमिति।

प्रताप। तत् कथमप्रत्यभिजानती प्रवर्त्तसे पुनरर्पयितुम्।

माधव। देवि!

"प्रमादतस्तु तन्नष्टं तावन्मात्रं नियोजयेत्।
अन्यथा स्तेययुक्तः स्यात् हेम्नश्चादत्ते विनाशिनि॥"

इति स्मृतेः, "तावदेव पुनरुत्सृज्य देय"मिति दानसागर-सिद्धान्ताच्च यद्यपि भवत्याः प्रवृत्तिरेव शास्त्रार्थः, तथापि दत्तस्य पात्रान्तरप्रतिपत्तौ स्तेयप्रत्यवायः स्यादिति महाराजस्याभिप्रायः।

पद्मा। करणिज्जं दाणिं आणवेदु गुरुअणो। (ध)

प्रताप। नन्वयं सुवर्णराशिरेव पात्रसात् क्रियतामिति।

पद्मा। तह। (इति सहभाजनं सुवर्णराशिं दुर्गापदाय ददाति।) (न)

सर्वे। (सविस्मयानन्दं साधुवादरुपस्तुवन्ति।)

दुर्गा। (परिगृह्य) हन्त! विस्मयविमुग्धः संवृत्तोऽस्मि, किमत्र ब्रवीमि। एतत्तावत्तर्कयामि—

कल्पः स्वर्गे वितरति तरुर्द्रव्यमाशास्यमानं
आशातीतं ननु पुनरयं मर्त्त्यवर्त्ती ददाति।
धन्यं मन्ये तदिदमधुना स्वर्गतो मर्त्त्यलोकं
न्यूनाधिक्यं भवति भुवने धर्म्मतस्तारतम्यात्॥२३॥

(इति निष्क्रान्ताः।)

(ध) करणीयमिदानीमाज्ञापयतु गुरुजनः।

(न) तथा।

वैतालिकाः । जयति विजयलक्ष्मीभाग्यलक्ष्मीकृतात्मा
प्रमहितमहिषी च श्रीमतीश्रीरिवेयम् ।
विजितसुरतरुश्रीः श्रीप्रतापः प्रतापी
जगति विजयतां वा जीवनं दीर्घजीवी ॥२४॥

(इति निष्क्रान्ताः सर्वे ।)

—o—

इति प्रतापराज्याभिषेको नाम षष्ठोऽङ्कः ।

—o—

सप्तमोऽङ्कः ।

——:०००:——

अथ प्रविशति सामर्षोद्वेगो वीरेन्द्रवर्म्मा ।

वीरेन्द्र । हन्त ! "यशोरेश्वमवसादयितुं प्रतिष्ठते मानसिंहः" इत्युपश्रुण्वन्नेव दिल्लीतः प्रस्थाय अविश्रान्तगतिरुपस्थितिमात्रमेव "छद्मना द्विषतां सर्वामवस्थामुपलभ्य प्रागेव प्रतिबोधयितुमाज्ञापितोऽस्मि" प्रतापेन । तत्र चोपगच्छन्नेव यदृच्छया दृष्टः प्राचीनसचिवेन दुरात्मना भवानन्देन परिचायितो मानसिंहाय । परन्तु प्राक्तनपुण्येनैवापक्रान्तोऽस्मि । तत् कथमयं कृतघ्नो नापसारितः प्रागेव प्रतापेन । येन हि—

वह्निर्विपक्षो न तथा भयावहो
यथान्तरस्थो विदितान्तरस्थितिः ।
स्फुटन् व्रणो दृष्टिगतः सुशोधनो
देहान्तरस्थस्तु निहन्ति देहिनम् ॥१॥

तदिदमेव वृत्तान्तमावेदयितुं बहु विचिन्वन्नपि नाधिगतः प्रतापम् । (विलोक्य) अये ! धीरेन्द्रदत्तः प्राप्तः । धीरेन्द्र ! क्वेदानीं राजा ? ।

प्रविश्य धीरेन्द्रदत्तः । नमः शस्त्रगुरवे । (इति प्रणम्य) सम्प्रति महाराजः स्वयमेव सर्वमङ्गलामुपास्ते ।

वीरेन्द्र। अपि वत्स महसि कथं नाम दुरात्मा भवानन्दो द्विषत्पक्षमनुप्रविष्ट इति।

धीरेन्द्र। तत् किमियतापि समयेन नमर्थमनधिगत एव भवान्?।

वीरेन्द्र। अयि! कथमधिगम्यते। वङ्गेशविजयात् परमेव हि स्वकार्य्यविपर्य्यासितचित्तस्य भारतस्वामिनः प्रवृत्ति-मुपलम्भयितुं सुखमयेन मदनमल्लेन च सह दिल्लीमनु-प्रेषितोऽस्मि प्रतापेन।

धीरेन्द्र। श्रुतमिदानीम्। तदामूलतः श्रूयतां समासेन। अभिषेकात् समनन्तरमेव हि महाराजो वसन्तरायमतेनैव कियता कैतवेन कियता च शौर्य्येणोत्कलान् विजित्य गोविन्द-देवोत्कलेश्वरयोर्विग्रहद्वयीं तस्मै समुपजहार। सोऽपि च तां यथास्थानं प्रतिष्ठापयामास।

वीरेन्द्र। इत्थमेवोचितमनुष्ठानं वर्षीयसः।

धीरेन्द्र। तेन च विजयेन सेनाधनयोर्नवीनोपचया-दुपचितं तदुभयबलं महाराजस्य। इतः पुनरार्य्यः शङ्करोऽपि वादसाहेन साकमचिरभाविनं महासमरमुत्प्रेक्ष्य चतुरतरैः सहचरैः सह संवत्सरं यावत् पर्य्यटन् क्वचिद्विभीषकया क्वचिदनुनयप्रवणतया क्वचिदुपायनसम्पदा यथोपयोगं विक्रम-पुराधिपतिं चन्द्ररायं केदाररायश्चान्तरेण वङ्गीयदशभौमिकान् शक्तिमतश्च प्रायेण साधारणानेकायनीकृत्य राजधानीमाजगाम। इत्यथो स्वयमेव देवः प्राच्यं सेनान्यं रघुं प्रतापसिंहञ्च

सार्थीकृत्य गत्वा विजित्य तावपि स्वमतमङ्गीकारयन्नागतः ।
तथा च— यथार्थमौत्थ्यर्थबलं यथा यथा
समृद्धिवृद्धिर्नवभूपतेरभूत् ।
तथा तथा सात्मजवृद्धभूभृतो
विरुद्धबुद्धिर्नितरामवर्द्धत ॥२॥

वीरेन्द्र । अस्त्येवं नैसर्गिको वः परश्रीकातरता वङ्गीयानाम् ।

धीरेन्द्र । उचितः खलु बहुदाहरणस्तवायमुपालम्भः । भवतु । विदितनिभृतविद्वेषोऽप्येकदा महाराजः समरायावश्यकं पश्यन् स्वानंशगतं चकस्रानामकं भूखण्डं सानुनयपरिवर्त्तनप्रार्थनयापि नावाप्नुवन् स्वयमपि विद्वेषविकृतः सञ्जातः । तथापि कदाचिद्वसन्तरायेण स्वजनस्नेहेनैव पितृपर्वणि समाहूतो रक्षिमात्रसहायः प्रविशन्नेव कर्म्माङ्गनं कृपाणपाणिना गोविन्दरायेणाक्रान्तः । गङ्गाजलं गङ्गाजलम् इत्युच्चैरुच्चारयामास च वसन्तरायः ।

वीरेन्द्र । (सविस्मयोद्वेगम्) हन्त ! कोऽयमकस्मादनर्थपातः ।

धीरेन्द्र । अथ पश्यन्नेवेदृशीं वीभत्सवैशसप्रवृत्तिं महाराजो निमेषेणैव निष्काशयन्नशनिभीषणं तरवारिम्—

गोविन्दपूर्वमुदितोद्धतपुत्रवर्गं
हत्वाञ्जसा हतधियं हतवान् वसन्तम ।
गङ्गाजलं पदमिदं वदने किलासीत्
गङ्गाजलं स्वमवितुं पवितुश्च नागात् ॥३॥

वीरेन्द्र । (सकरुणम्) हा हा । प्रतापहस्तेनैवास्त-मुपगतो वसन्तराय: ।

माहृशीनमुपलालयन्नमुं
सोऽमुनैव निहत: सहात्मजै: ।
दूषिता हि परमाततायिता
तत्र चेत् किममृताद्विषोद्गम: ॥४॥

तत् किं वृद्धस्य मृत्युमवश्यं पश्यत एव गङ्गाजलयाचनम् ।

धीरेन्द्र । न खलु । गङ्गाजलाभिधानो हि तस्य तरवारि: ।

वीरेन्द्र । तेन हि कथमपि न कृतघ्नतया प्रतापमवमन्तु-मर्हामि । यत:—

विस्मृत्य विद्वेषमपास्य सम्बलं
प्रसन्नचित्त: स्वयमेकलो गत: ।
हत्यां विनैवाक्रमतां किमाचरेत्
सदात्मरक्षा श्रुतितो हि विश्रुता ॥५॥

एतावता च भवानन्दस्यापि पर्य्याप्तमेव जातं प्रतिकूल-व्यवहारवीजम् ।

धीरेन्द्र । तदानीञ्च पश्यन्त्येवेदृशं भीषणवैशसं वसन्त-रायमहिषी कनीयांसमात्मजं राघवमादाय कचुवने प्रच्छन्ना कथमपि कृतवती प्राणत्राणम् । परञ्च सह मृता । राघवस्तु कचुवने रक्षित इति कचुराय इत्याख्यायते । तन्मातुलस्तु रूपरामवसुस्तं पर्य्यवेक्षितुं भवानन्दमुपदिश्य प्रतिविधित्सया वसन्तरायबन्धुं हिजलीपतिं ईशाखाँभिधानं शरणमुपगत: ।

ईश्याख्याँ अपि देवप्रतापस्य- विदितप्रताप: प्रसभप्रवृत्तिमपहाय सत्यसन्धं देवं प्रति विवृताभिप्रायं बलवन्तसिंहं नाम सेनापतिं प्राहिणोत्। अथासौ साहसमात्रसहाय एवोपागम्य रहसि विषयविशेषं संलपितुमिवोपनीतस्य देवस्य सहसै-वाक्रमणोरसि निपत्य गलमण्डले महोज्ज्वलभीषणां शस्त्री-मस्थापयत्—

वीरेन्द्र। (सातङ्कम्) हा हा! कोऽयमतर्कितो दुर्विपाकः।

धीरेन्द्र। —अब्रवीच्च—"राजन्! प्रतिजानीहि तावत्—

मम राघवमत्रैव हस्ते न्यासीकरिष्यसि।
यावच्च हिजलीयानं नान्तरायं चरिष्यसि ॥६॥

अन्यथा स्मरेदानीमभीष्टदेवताम्" इति।

वीरेन्द्र। (सविस्मयम्) अहो साहसिक्यम्! अहो चातुर्य्यम्!।

धीरेन्द्र। अनन्योपायश्च देवो वाढ़मित्यङ्गीचकार। सोऽपि नवं जामातरमिव राघवमादाय गत्वा स्वामिने समुपजहार पारितोषिकञ्चाजहार।

वीरेन्द्र। साधु बलवन्तसिंह! साधु, साधितं किल दुःसाध्यं साहसालङ्कृतबुद्धिमात्रव्ययेन।

धीरेन्द्र। इतश्चैको रोषादाक्रमणाय अन्यश्च त्रासादात्म-त्राणाय सरभसमिव समारेभे समरसम्भारं संग्रहीतुम्।

वीरेन्द्र। वृत्तान्तक्रमेणोभयोरपि साम्प्रतिकमेवैतत्।

धीरेन्द्र। अत्रान्तरे खण्डहरवणाय वङ्गोपसागरतीरोपान्त

नवनिर्म्मितदुर्गेषु सेनासमावेशं कुर्वता सेनापतिना सूर्य्यकान्तेन रडानाम पर्त्तुगीजजातीयो जलदस्युः स्वजातीयसेनापोतसमेतो वशीकृत्यानीतः। देवेन चासौ दण्डविनिमयेन दानमाना-भ्यासावर्जितो धर्म्ममन्दिरस्थापनाश्वासनेनानुरञ्जितः कृतश्च नौसेनापतिः। स तु परस्तात् प्रायेणादर्शयच्चमत्कारिणीं खलु समरचातुरीम्। सञ्जातश्च दस्युतोऽप्यभावनीयं कल्याणम्।

वीरेन्द्र। अये! किमुच्यते।

काले सुदुर्जनेनापि सिध्यत्येव महत् फलम्।
सन्निपातविकारे हि विषं खल्वमृतायते ॥७॥

धीरेन्द्र। कतिपयैरेव च दिवसैर्जलस्थलोभयगामिनीं विशालवाहिनीं परिचालयन् गत्वा हिजलीराजधानीमवरुरोध। अनन्तरञ्च—

संविघ्नन् विहतः श्वसन् विश्वसितः सम्मर्द्दयन् मर्द्दितः
व्याविध्यन् प्रतिविद्ध उद्धतगतिर्धावन् पुनर्धावितः।
उद्गर्जन् प्रतिगर्जितः क्वचिदसौ भग्नो जितः सञ्जयन्
इत्थं पूर्णजयश्रिया त्रिदिनतो देवः प्रतापो वृतः ॥८॥

किन्तु प्राग्गो रूपरामो विजयं सर्वथैवासम्भावयन् प्रागेव कचुरायमादाय दिल्लीमभिप्रस्थित इत्यसौ नावगृहीतः।

वीरेन्द्र। सम्भवत्येवं नाम।

धीरेन्द्र। ततः प्रतिनिवृत्तश्च देवो भाविने महासमरायोद्-युञ्जानः क्षणमपि न विश्राम्यन् स्वयमेव प्रतिविषयं

पर्य्यवेक्षमाणः संवत्सरं यावत् नव-नव-दुर्गनिर्म्माण-सैनिक-सामग्रीसंग्रहादीनन्वतिष्ठत् । अकस्माच्च भवत्प्रेषितात् सुख-मयात् पश्चाग्रतसहस्रसैन्योपपन्नमभिधावन्तं इब्राहिमं नाम दिल्लीशसेनापतिं तस्य च सर्वामवस्थामाकर्ण्य सकलसेनापोत-समेतो वजवजदुर्गमुपेत्य यथाकालमागतेन तेन सह समरे प्रवृत्तः ।

वीरेन्द्र । (सोत्कण्ठम्) ततः ? ।

धीरेन्द्र । ततस्तु ।

दिनत्रयं घोररणैरतीतं दिने चतुर्थेऽवसमाद शत्रुः ।
तत्रैव रक्ता रजनी शशाङ्कं देवं जयश्रीश्च समं समागत् ॥८॥

वीरेन्द्र । अथ मत्प्रहिताम्मदनमल्लाल्लक्षसैनिकसनाथं द्वाविंशत्यामीरपदोपाधिभिर्महायोधैः पुरस्कृतं प्रस्थित-माजिमसुपश्रुत्य किमाचरितं महाराजेन ? ।

धीरेन्द्र । स तु स्वप्नोपमो वृत्तान्तो न खलु श्रद्धामादधीत । येन हि विहारान् विजेतुं मबलवाहनः समन्ताद्वह्निग्नि-पूर्णभूगर्भं गोविन्दपुरदुर्गं यावद्गत एव देवो मदनेनागत्य सविशेषमाजिमप्रत्यासन्निमाख्यातः । अथ तु परित एव ससङ्केतं ससैनसेनानीसमवायमावेश्य वागुरामिव शतघ्नी-श्रेणीमभितः सज्जीकृत्य क्रोशान्तरमपससार । ततश्च सकलमेव यवनबलमुपस्थाय त्रासादपसृतानिवास्मान् मत्वा प्रदोष-समयादेव नर्त्तकीनां नृत्यादिभिरामोदमग्नं निशीथे च महानिद्रामभ्यसितुमिव गाढ़निद्रामुपेतम् । परन्तु देवस्य

तद्दर्शनादनन्तरमेव सर्वतः सहसोज्जगार शतघ्नीस्तोमो गुलिकावलिम्। तेन च प्रायेण द्विषत्सेनाभ्युत्थानेन सहैव पतनम्, चैतन्येन सहैव च चिराच्चैतन्यमभजत। सहसा च—

कस्मादकस्मादियमापदाप नः
जहीहि जाड्यं जहि वीर! शात्रवान्।
वदन्निदं भूमजिताजिराजिमः
निद्रां त्यजन्नेव चिराय निद्रितः ॥१०॥

अवसन्नायाञ्च यामिन्यामुर्वोर्म्मीणां परिस्फोरणेन निःशेषमेव यवनबलं विध्वंसयन् विध्वस्तो दुर्गवर्ग इति।

वीरेन्द्र। (सानन्दम्) अहो! कृतकृत्या धन्याः खलु यूयम्। भवतु, तदनन्तरः को वृत्तान्तः?।

धीरेन्द्र। अनन्तरन्तु पुरावृत्तानुवर्त्तिनो नाटकस्य विष्कम्भक इव देवः केवलामेव वैचित्र्यविहीनामवाप वृत्तिम्। इदन्तु वत्सरद्वितयं यावद्दिल्लीपतेः कुतो विराम इति न जानीमहे।

वीरेन्द्र। वयं जानीमहे। अस्मिन्नन्तरे आकबरे परलोकं गते तदात्मजः सेलिमः प्राचीनमन्त्रिगणसाहाय्यकेन खसरुस्य नप्ता मातुलमानसिंहादिपक्षपातलाभेन सिंहासनमधिकृत्य परस्परं पिता पुत्रश्च विवदमानो महान्तमेतावन्तमतिक्रान्तः समयम्।

धीरेन्द्र। अहो! गोखादकानां सर्व एव व्यवहारः शिरःशूलमुत्कोपयति।

वीरेन्द्र । परन्तु नीतिनैपुण्येन सेलिम एव जाहाङ्गीर-मुपाधिमादधानः सिंहासनमारूढ़ः । अनन्तरञ्चासौ—

नष्टवङ्गपुनःप्राप्तिर्यशोरेशजये भवेत् ।
मानसिंहजये च स्यात् प्रधानवैरिणः क्षयः ॥११॥

इति चिन्तयन्नेव हिलक्षसैन्योपपन्नं मानसिंहं प्रेषयामास । अहन्तु प्रवृत्तिप्राप्तिक्षण एव दिल्लीतो निरगच्छमिति ।

धीरेन्द्र । (साटोपम्) आर्य्य ! इदानीं तथा यतितव्यम्, यथा सेलिमस्यैव क्षयनिदानं तस्य प्रधानवैरिणः क्षयः सम्पद्यते ।

वीरेन्द्र । बाढ़म् ।

(इति निष्क्रान्तौ ।)

विष्कम्भकः ।

—०—

ततः प्रविशत्युत्कलेश्वरशिवलिङ्गायतने भवानन्दः ।

भवा । (सकरुणम्) हा देव ! वसन्तराय ! अयं स ते भगवानुत्कलेश्वरः, त्वं पुनः क्वासि ? । इह हि ध्यानप्रत्ययादसन्तमपि भवन्तं सन्तमिवावलोकयामि । अथवा—

यशोमयी यस्य तनुः सनातनी
स्थिता जगत्यां स तु सन्नसन्नपि ।

रविर्विलीनोऽपि तदुपरि द्युति
प्रदर्शनादस्तितयैव गम्यते ॥१२॥

तथा च निविड़कान्तारे कान्तमपूर्वं यशोरनगरम्, नगरोपकण्ठे सर्वाङ्गोपपन्नमार्य्यसमाजम्, कालीघाटे भवानी-मन्दिरम्, गोपालपुरे गोविन्ददेवम्, अत्र चेममुत्कलेश्वरं प्रतिष्ठाप्य, पात्रेषु दानम्, दीनेषु दयाम्, साधुषु च सौहार्द्दं सम्पादयन् त्वं खलु, मृतोऽपि जीवित एवासि। अहं पुनर्मन्दभाग्यः प्रतिपदमनुभूतशङ्करावस्कन्दनः सर्वदा सातङ्क-सञ्चारी जीवननिरपेक्षं भवदीयसम्पदमेतावता समयेन पर्य्यवेक्षमाणो जीवितोऽपि मृत एवास्मि। अहोवत!।

समारूढ़े नन्दे दिवमिव वसन्तेऽतिसदये
वहन् भक्तिं जातः परिच्युतधुरो राक्षस इव।
कृताशस्तस्यासीत् स तु मलयकेतुर्न्निलयनं
ध्रुवं कश्चित् केतुर्न्निलयनमभून्मेऽपि निभृतः ॥१३॥

स पुनः कौटिल्य इव कुटिलमतिः शङ्करः। तथा च—कौटिल्यो महाविद्वान् निगृह्य राक्षसं पदान्तरे साचिव्य-मग्राहयत्। अयं पुनर्महावीरो मां निग्रहीतुमर्हति चेत् कृतान्तपुरातिथ्यमेव ग्राहयिष्यति। विशेषतश्च मयैव परिचायितो वीरेन्द्रवर्म्मा रक्षिप्रमादादपक्रान्तः, तन्मुखेन तु विदितवृत्तान्तः प्रतापो न खलु ब्राह्मणतयापि मां क्षमेत॥ तदिदानीं प्रतापप्रभावेण जीवितमिवोपरतमपि प्रभुमेवानु-गच्छामि; अथवा मानसिंहप्रभावेणायुष्मन्तं राघवमेव राजोपाधिना

समलङ्कृत्य यशोरं गमिष्यामि। (सविषादम्) भवतु। साक्षात्-कृत्य तावदायुष्मन्तमेतावतो वृत्तान्तानावेद्य तिरोधानमपि मे कथञ्चिन्मनोनिर्वाणाय भविष्यति। तत् कथं चरमुखेनात्रोप-स्थानं सन्दिश्य चिरयति कुमारः। (विलोक्य सोच्छ्वासम्) अहो! प्राप्तः खल्वसौ।

ततः प्रविशति तुरगारूढ़ो योद्धृवेशेन राघवरायः।

राघव। (समन्तादवलोक्य सास्रम्) हा तात! शान्तिप्रिय! अयमेव स ते शान्तिमयः शिववाटः। अत्र हि—

सह साधुजनेन निश्यपि
तव गानैः प्रमदः पुराभवत्।
वनजन्तुरवैर्दिवापि तु
महती भीतिरुदेति सम्प्रति ॥१४॥

(सवैक्लव्यम्) हा पितः! हा मातः! हा अग्रजाः!। (इति मूर्च्छति।)

भवा। कुमार! समाश्वसिहि समाश्वसिहि।

राघव। (आश्वस्य) आर्य्ये! कुतः समाश्वासो मन्द-भाग्यस्य। येन हि—

अस्निह्यदात्मसुततोऽपि विशेषतो यं
तेनैव तान् क्रमहतान् निहतः प्रपश्यन्।
अद्यापि तत्प्रतिकृतिस्तु गतास्तु दूरं
हा हा निवापजलमप्यददां न पापः ॥१५॥

अपि च। मया हि दारुणदैवसन्निपातात्—

प्रसूति-पितृ-सगर्भा मङ्गजस्वर्गभोगे
झटिति विषमभोगं मुक्तमुग्रं श्मशानम्।
वहति भुवनसारस्नेहराशिप्रवाहे
सपदि हृदयदारी प्रेम्णि रक्तप्रवाहः ॥१६॥

यदा च तदाकस्मिक-भीषण-बीभत्स-वैशसेन भयशोक-समाकुला बान्धवो रोदितुमप्यशक्नुवाना नयनसलिल-मप्यवरुन्धानाः क्लतश्रतयेव बन्धुवर्गमनुकुर्वन्तं शोकपिधायिना त्रासेन निष्पन्दं शवसमुदायमिव मामप्युपादाय श्मशान-मुपगताः, तदानीन्तनन्तु वृत्तान्तं चिन्तयतोऽपि विदीर्य्यते हृदयम्, शरीरञ्चाञ्चति रोमाञ्चम्। अहह! सतीशिरोमणिः पुरन्ध्रीपुरोवर्त्तिनो हि मे जननी—

कबन्धं सव्वञ्च विवृतनयनं शोणिततत
मुखं तत् पश्यन्ती शुगनलविशुष्कं क्षणजला।
चितामारोहन्ती स्फुटितहृदयापि स्फुटगिरा
विशोध्यं वत्सेदं मुहुरिति वदन्त्येव पतिता ॥१८॥

भवा। कुमार! समतीतो वृत्तान्तस्तदात्मानं पर्य्यवस्थापयता साम्प्रतिकमेवावधीयताम्। (विमृश्य) मन्ये च तत एव देव्याः शेषादेशाद्भवन्तो विप्लवमाशङ्कमानो दुरात्मा प्रतापो रूपरामेण सानुनयमनुरुध्यमानोऽपि न त्वामभिपिप्राय मम हस्ते समर्प-यितुमिति।

राघव। अत्र कः सन्देहः। तदानीं हि काराभवनमिव

धूमघाटमुपनीतः परिवारितश्चास्मि नक्तन्दिवं किङ्करकृश्मना रश्मियुगलेन।

भवा। अहमपि भवतो हिजलीगमनात् प्रभृत्येव प्रतिपदं पथ्यवेष्टितः प्रतापानुगतो नाम भूत्वा प्रजाभ्यः केवलराजग्राह्य-करग्रहणेन पथ्यं पूरयं कोषसञ्चयम्। यदा च हिलसेनासनाथेन महावीरमानसिंहेन सममुपागतो वर्द्धमानं यावत् कुमार इति कुमारस्यैव चरमुखादश्रौषम्, तदैव च वारुणीस्नानापदेशेन गत्वा गोविन्दपुरापरपारे साक्षात् कुर्व्वता कुमारेण शोकवेगविगलिताम्बुधारेण प्रत्यायितोऽस्मि स्ववर्गेषु। इतश्च जानास्येव यथा सम्मुखसम्प्रहारं परिहरन् आहारमपहरन्नेव संहाराय यतते स्म ससैनमानसिंहस्य दुरात्मा प्रतापः।

राघव। तदिदं जानाम्येव। एष तु कुतो नाम सञ्चितो विशालः शस्यराशिः?।

भवा। कुमार! अवधोयतां तावत्। पत्नीसूनुसमेतस्य सुगृहीतनाम्नो देववसन्तरायस्य प्रत्येकमौर्द्ध्वदेहिकेषु समामन्त्रणीयसमाजोपयोगाय चकश्रीप्रदेशे सञ्चितोऽसौ प्रभूततमः शस्यराशिः। उपेक्षितश्च प्रत्ययिताम्तरेण सततसमर-व्यापृतेन दुरात्मना प्रतापेन। परञ्चामीषामाहारापहरणेनैव संहाराभिसन्धिमनुसन्दधता पाश्चात्यदुर्गाङ्गनानि च विस्फोरक-पूर्णाम्तराणीति सविशेषं जानता पन्थानमतीवभूयांस-मङ्गीकारयतापि तस्यामेव चकश्रियां समुपनीय समावेशितो महाराजः ससैनो मानसिंहः। तदेतत् कुमारापेक्षयैव

जीवननिरपेक्षेण मया सर्व्वमनुष्ठितमिति कुमारस्यै वेदानीमनु-भवास्पदं जातम्।

राघव। (सोच्छ्वासम्) आर्य्य! नानुभवप्रयोजनमपेक्षते भवतः स्वामिरागः। सर्व्वथा सुसचिवोऽसि तातस्य। तथा च—

सदमात्यमनः स्वच्छं तथा सारस्वतं पयः।
पतिं पूरयितुं याति विपन्नमपि च स्वयम्॥१८॥

भवा। (निश्वस्य) कुमार! विधिविपाकात् पूरयतापि किं करिष्यते। आकाशकुसुमं हि नः खल्वियं प्रत्याशा। येन हि—चतुरो दुर्जयान् वीरान् जयी जितवतः कुतः।

स्थिरैवैकविधस्येह प्रायो न व्यभिचारिता॥१८॥

राघव। आर्य्य! न खलु तेषु बिभीषणः प्रत्यासन्न आसीत्। तत् सर्व्वथा समाश्वसिहि। नाहं कापुरुषजन्मा, न पुनः स्वयमपि वा कापुरुषोऽस्मि, यत् केवलपराश्रयेण जयश्रियः प्रत्याशा।

भवा। कुमार! सम्भाव्यते तावत्। किन्तु श्रुतं हि—यदा किल महाराजमानसिंहस्य सन्देशहरो धूमघाटे राजसभाया-मुपासन्न एवायसीं शृङ्खलां निशातमेकं तरवारिञ्चोपनिधाय सभ्यमिव साटोपमवोचत्—"भूस्वामिन्! गृह्यतामनयो र्महाराजमानसिंहेन प्रणयादुपहृतयोरेकतरः" इति। तदा तु केशवभट्टः प्रतापेङ्गितेन समुद्गर्ज्जन्नुत्थाय तरवारिमेव गृहीत्वा प्रत्यवोचत्—"अवध्य! सन्देशहर! ब्रूहि गत्वा दुरात्मानं यवनश्यालकम्—

अयं तेन दत्तः कृपाणोऽमुनैव
प्रसिद्धिप्रमेन्ं ससैन्ं निहत्य ।
ततोऽस्य स्वसुः स्वामिनं सैलिमश्च
प्रतापोऽचिराद्वङ्गनाथो निहन्यात् ॥२०॥

एष हि तस्य सत्यसन्धतया घोषितस्य मुखान्तरितः शपथः” इति ।

राघव । आर्य्ये ! किमेवमाशङ्क्यते । मया हि दिल्लीं गतेनैव तावदिमान् त्रीनब्दान् यावद्विचक्षणेभ्यः सादरशिक्षया समर्जिता हि विलक्षणा नाम दक्षता शस्त्रविद्यासु । तदवधीयतां तावन्ममाप्ययं शपथः ।

पैशाचिकीं नरपिशाचकृतां निहत्यां
संस्मृत्य तां निहतबान्धवसंख्यया तम् ।
दस्युं विखण्ड्य विदधे जननीनिदेशं
तेनैव वा विनिहतोऽनुसरामि बन्धून् ॥२१॥

भवा । श्रद्धीयते तावत् । किन्तु—

राघव । किन्तु किम् । उपक्रान्तो हि समरस्तत् सम्प्रत्येव प्रत्यक्षीकरिष्यसि विक्रमं तावत् ।

भवा । (साकूतम्) किमुपक्रान्तः समरः ? ।

राघव । अथ किम् ।

भवा । तत् कथम् ।

राघव । अवगम्यते । आगतोऽस्मि तावदार्य्याया आशिष-मादातुम् । (इति प्रणमति ।)

भवा। वत्स! विजयस्व वैरिवर्गम्, प्रमोदयस्व च बन्धुसमाजम्। (सकरुणम्) किन्तु तात! वसन्तरायकुलतान्तो! भिद्यते तावच्चिराच्छितो ब्राह्मणः—"वङ्गीयः सर्व्वथा दुर्ज्जय-प्रताप-प्रखर-सूर्य्यकान्तानां दृष्टिपथ" इति।

राघव। आः! किमुच्यते—दुर्ज्जयाः खल्वमी दुरात्मान इति। श्रूयतां तर्हि—

वीराणां निवहो निगूहति गुहं दस्यु, प्रतापश्च चेत्
पापं ब्राह्मणमप्यसुं क्षणमपि प्राप्य क्षमिष्ये न तान्।
हत्वैतान् स्वबदुष्टाचाररुधिरै र्बन्धून् पुरा तर्पये
कः पन्था परिपन्थिनां युधि भवेत् पश्य स्वयं दूरतः ॥२२॥

तदध्रुवमभिदधामि, श्रद्दधातु भवान्। अचिरादेव हि—

युद्धेऽत्र पापपतितोऽपि पतेत् प्रतापः
सैवोत्पतेत् पुरि पुनर्ज्जयवैजयन्ती।
संशोधयेत् परदृगम्बु निजास्रराग्निं
निर्व्वापयेदपि च बन्धुऋणं जनोऽयम् ॥२३॥

नेपथ्ये। (कलकलान्तरम्) कालि! कालि! कालि! दानवद्राविणि! आज्ञा आज्ञा आज्ञा हो!।

राघव। आर्य्य! आर्य्य! न खलु सम्प्रति क्षणक्षेपोऽपि मे साम्प्रतम्। (इति तुरङ्गमारुह्य द्रुतं निष्क्रान्तः।)

भवा। हन्त! प्रस्थितः कुमारः। तदहमपि कियन्त-मवेक्ष्य समरप्रकारं पूर्व्वमित्राहारसंग्रहेण महाराजं मानसिंह-मेवानुवर्त्तिष्ये। (प्राकारशिखरमारुह्यावलोक्य च) आः! प्रवृत्तोऽयं दारुणः सम्प्रहारः। तथाहि—

अस्त्रै रस्त्रै र्वियदपिहितं वीरवारप्रयुक्तैः
शस्त्रैः शस्त्रैः क्षतमविरतं तीव्रमन्योन्यदेहम् ।
स्रस्तैः स्रस्तैः क्षितितलमलं स्नातमस्त्रै रजस्रं
प्राणैः प्राणै र्विनिमयविधिः साध्यते साधु योधैः ॥२४॥

(विशेषेणावलोक्य) साधु वङ्गवीराः ! साधु, अवसादितप्राया हि खल्वमी युष्माभिः ममोगला राजपुताः । (सवैक्लव्यम्) अहह ! नरकेऽपि न स्थानं मादृशानां स्वजातिदेशद्रोहिणाम् । कुतः—

धन्याः किलामी जयपुष्पमालया
जन्मावनीं भूषयितुं समुत्सुकाः ।
वयन्तु पापा बत बन्धुमुद्यताः
अधीनताशृङ्खलया चिराय ताम् ॥२५॥

तत् प्रतापविजये सम्पत्स्यते खलु शाश्वतं भारतस्य यवनात् भवानन्दस्य च जीवनाद्विमोक्षः, मानसिंहविजये तु जन्मभुवः कण्ठे दास्यशृङ्खला भवानन्दस्य तु कलङ्कमाला वज्रलेपायिता । साधु भवानन्द ! साधु, आविष्कृता खलु त्वया चमत्कारिणी चिरसाचिव्यसञ्चिता बुद्धिचातुरी, यदुभयथापि नास्ति निष्कृतेः पन्थाः । (सोन्मादमिव) धरातल ! धरातल ! देहि मे तलातले प्रवेशावकाशम् । (विभाव्य) तत् किमहमेक एवास्मिन् पथि पथिकः संवृत्तः । न खलु, प्रथम एव कुतुवुद्दीनसङ्गरे पृथ्वीराजद्वेषाज्जयचन्द्रः, वङ्गेष्वपि वक्तियारसमागमे द्वितीयो राज्यलोभाल्लक्ष्मणसेनसचिवः पशुपतिः, तृतीयस्तु सस्वामिक-

शङ्करद्वेषात् राज्यलोभाच्चेदानीं दुरात्मा भवानन्दः। तत् कस्य हेतोरेकस्य दोषो भवानन्दस्य। अहह !

हितैषी देशस्य स्वजनधनसञ्जीवनपणात्
स्वतन्त्रत्वस्वर्गं भुवि यदि यतेतारचयितुम् ।
निपात्यैनं पापः पतति परतन्त्रत्वनरके
शिधिर्वामः कामं दलति हि चिराद्भारतभुवम् ॥२६॥

(सनिश्वासम्) नास्ति च सम्प्रति प्रतिनिवृत्तेरपि पन्थाः फलं वा ।

नेपथ्ये । कालि ! कालि ! कालि ! दानवद्राविणि ।

भवा । (सोद्वेगम्) तत् कथमकस्मादुच्छ्रासः प्रतापसेनायाः । (विलोक्य) हन्त ! इदं तदुपस्थितमाशङ्कितचरम् । अपसरन्त्यमी भग्नसङ्घाः समोगलाः क्षत्रियाः, अनुसरन्ति च सोल्लासं वङ्गभटाः। तत् कोऽयमन्यमाक्रामन्नित एवाभिधावति । (निरूप्य) हा धिक् ! आक्रान्तस्तावन्मानसिंहनन्दनो दुर्जनसिंहः, आक्रमिता चायमुदयमानादित्यतेजोयान् कुमारः खलूदयादित्यः। (सवैधुर्य्यम्) हा हा ! विस्रस्तेदानीं सा किल गगनगामिन्याशालता । तत्त्वरितममुना कान्तारोपान्तवर्त्तिना निभृतवर्त्मना निःसृत्यान्विष्यामि तावदायुष्मन्तं राघवम् । (इति द्रुतं निष्क्रान्तः ।)

ततः प्रविशत्याक्रम्यमाणो दुर्जनसिंह आक्रामंश्चोदयादित्यः, विभवतश्चोभयबलम् ।

दुर्ज्जन। अये! शस्त्रभङ्गादवसन्नमाक्रामसि। धिक् कापुरुषताम्!।

आशीविषस्य विषदन्तचये विनष्टे
गात्राणि जर्ज्जरयते बत कुक्कुरोऽपि।
सिंहस्य दैववशतो विशतश्च जालं
आकर्षति स्फुटजटां हरिणोऽपि शृङ्गैः ॥२७॥

उदय। आः! किं ब्रवीषि—शस्त्रभङ्गादवसन्नोऽसीति। तद्गृह्यतामिदम्। (इति तरवारिमर्पयति।)

दुर्ज्जन। (गृहीत्वा स्वगतम्) अहो! अहो! अवतारयन्ति हि मत्सरिणो हृदयादर्शेष्वस्माकं वङ्गीयचरित्राणां विकृतच्छायाम्। यत्सत्यमस्य सौजन्यपूतशौर्य्यमीक्षमाणो वीरपोतस्य विस्मित एवास्मि। ईदृशं तावदुदाहरणं जगत्यां विरलमेव। तथा च—

विकसति रमणीयं शैवलौघेऽपि पद्मं
भवति च विसदृक्षं शैवलं पद्ममध्ये।
न सदसदवधानं जातितो देशतो वा
विलसति हि विचित्रा सृष्टिरीदृग् विधातुः ॥२८॥

उदय। दुर्ज्जनसिंह! अपि वागुरां पश्यतस्तवायं निस्पन्दीभावः।

दुर्ज्जन। वङ्गेष्वपि सौजन्यं जन्यञ्च पश्यतो विस्मितस्यैव निस्पन्दीभावः।

उदय। पार्व्वत्यपशोः स्वर्गसद्भावं पश्यतः सम्भवत्येव विस्मयः।

दुर्ज्जन। प्रासग्रस्तः प्रापयितारं प्रत्येव प्रयोग इत्यपूर्व्वो विस्मयप्रकारः।

उदय। हिन्दुः खलु हिन्दुदेशे पुनरपि हिन्दुराज्यं स्थापयितुमुद्युक्तो, प्रतिवध्नाति च हिन्दुनाम्नैव कश्चिदित्यय-मप्यपूर्व्वो विस्मयप्रकारः।

दुर्ज्जन। कायस्थ इति स्वयं हीनोऽप्यात्मनो हिन्दुतया श्लाघते वङ्गेष्वेव।

उदय। यवनीजातोऽपि हिन्दुम्मन्यो हिन्दुस्थान एव।

दुर्ज्जन। पापः खल्वभिद्रुह्यति राजानम्।

उदय। अहो! यवनश्यालो ह्यात्मनैवात्मानमभिधत्ते राजानम्।

दुर्ज्जन। अये! जानीहि तावत्, यवन एवोत्कृत्य रसनां विधास्यति ते मुखदण्डम्।

उदय। अरे! त्वमपि ध्रुवं प्रतिपद्यस्व खल्विदम्, यत्—भौमिक एवोच्छिद्य युष्मत्प्रायान् यवनान् निधास्यति पुनरपि धर्म्मराज्यम्।

दुर्ज्जन। आः! किमुक्तं भवता—भौमिक एवोच्छिद्य यवनान् निधास्यति राज्यमिति। एष हि पतङ्गस्य वह्निग्रास-प्रयासः, पङ्गोर्गिरिलङ्घनोत्साहः, वातग्रस्तस्य च सागरसन्तार-सङ्कल्पः।

उदय। अये पार्व्वत्य! वर्व्वरापसद! नूनमवगम्यतां तावत्—

उद्यन्नर्कः क्षपयति तमोराशिमल्पोऽपि गाढ़ं
मूर्च्छन्नग्नेः कण इह वनान्याशु भस्मीकरोति ।
पापान् प्राज्यानपि हि विधमेद्धार्मिकः स्वल्पकोऽपि
व्याप्तिः शक्तिर्न भवतितरां सारवत्त्वेव शक्तिः ॥२९॥

दुर्ज्जन । इदमपि सार्व्वभौमस्य प्रसादविस्फूर्जितम् । तस्मा पुनर्विकत्थस्व तावत् ।

समुद्रः पुरः पूरयन् पूरदानैः
समाकृष्य धत्ते पुनः पल्वलाभाः ।
स्वयं सम्प्रदत्तं बलं वादसाहः
सहप्राणमेव स्वयं वो हरेत्त्व ॥३०॥

उदय । अरे अनात्मज्ञ ! तवापि कृतघ्नस्य मत्प्रसादादेव विस्फूर्जितमिदम् ।

आसन्नमृत्युविकलो गलदस्त्रसिक्तः
क्षुस्तायुधो जड़विधो व्यपधावितः सन् ।
शस्त्रं पुनः कटु रटन्नुपलभ्य मत्तः
योगार्थतोऽपि ननु दुर्ज्जन ! दुर्ज्जनोऽसि ॥३१॥

अपि च । रे क्षत्रियकुलकलङ्क ! युष्माकं वादसाहः किं न व्यति चेष्टातः ? । स हि—

देवग्राह्यं वङ्गराज्यं जिघृक्षुः
भूयो भूयः प्रोद्यतो व्याहतोऽपि ।
पार्श्वस्थान् वः प्रेषयन् पापवृत्तीन्
लज्जाशून्यः सारमेयोऽद्य वृत्तः ॥३२॥

दुर्ज्जन। आः क्षुद्र! पाषण्ड! सार्व्वभौममप्यधिक्षिपसि। तदेष हि ते परमोपदेशः। अस्माकं किल—

अवनम चरणान्ते प्रार्थय प्राणभिक्षां
प्रतिशृणु, बहु चोच्चै रात्मनेवात्मदण्डम्।
शुभमनुभव कामादन्यथा चेद्भवाशु
स्वजनपुरसमेतश्चूर्णपेषं हि पिष्टः ॥३३॥

उदय। अरे अरे यवनपदलेहनसारपुरुषार्थ! क्षत्रियवंशपांसन! ध्रुवं नाम तावत्—

सर्व्वान् वर्व्वरपर्ब्बतीयनृपशून् दः खर्व्वयन् पूर्व्ववत्
धावन् दुर्द्धरनिर्ध्वनद्गजघटाटोपः प्रतीच्यां क्रमात्।
देशाद्देशमशेषमेष सवशः शूरः समं सञ्जयन्
स्फूर्ज्जन्नूर्ज्जितबाहुवीर्य्यविभवाद्गोघातकान् घातयेत् ॥३४॥

दुर्ज्जन। अरे ओदनभोजिन्! तर्कयसि किं नाटकाभिनय इव राज्यविजयो गर्ज्जनमात्रेण?।

उदय। आः शक्तुभोक्तः! त्वमपि किं मन्यसे यवनानुग्रहस्तेव राज्यरक्षापि भगिनीप्रदानमात्रेण?।

दुर्ज्जन। रे रे कायस्थापसद! राजद्रोहिदस्युनन्दन! अतीव नाम प्रगल्भसे।

पोतः प्रौढ़ः स्थवीयान् भवति युधि पुरो यः प्रतीपः प्रतापात्
हत्वा तं तं समन्ताज्ज्वलितहुतवहज्वालयादह्य देशम्।
क्रन्दन्तीनां वधूनां नयनजलचयैस्तच्च निर्वाप्य तापं
शाम्यः श्रीवादसाहो ज्वलित इव रुषाऽस्त्रैः पितापुत्रयोर्वाम् ॥३५

उदय। अरे रे अनार्य्य ! निर्म्मर्य्याद ! मनुष्य-कुलपांसन ! यवनशृगालसन्तान ! न सत्रादव्यापादितस्य ते वाग्विरामः ।

विधाय विदुधूषतः समिति खण्डखण्डान् बहून्
पशून् पिशुनमानसापसदमानसिंहादिमान् ।
यशोरपति-चित्तग-त्तुभित-तीव्र-रोषानले
इहैव जुहवानि वस्तदनु वादसाहाधमम ॥३६॥

दुर्ज्जन। अरे अरे मण्डूककल्पजल्पाक ! आरण्यदस्यो !
तिष्ठोत्तिष्ठस्व योद्धुं प्रकटकटुपटध्वानमात्रेण योद्धः !
निःशेषं नामशेषं जनमिह विदधे भूमिसाद्दा पुरं वः ।

उदय।
आक्राम क्राम वास्मात् क्षपयसि समयं किं वृथानल्पजल्पैः
म्लेच्छोच्छिष्टोपजीविन्नचिरमिह भवेद्भारतं म्लेच्छहीनम् ॥३७॥

दुर्ज्जन। (शस्त्रमुद्यम्य) आः पाप ! दुरात्मन् ! ।
उदय। (असिमुद्यम्य) आः पाप ! दुरात्मन् ! ।

(इति निष्क्रान्तौ ।)

इति दुर्ज्जननिधनं नाम सप्तमोऽङ्कः ।

अष्टमोऽङ्कः ।

——:०ः——

अथ प्रविशति शिविराङ्गने व्याकुलान्तःकरणो मानसिंहः ।

मान। (सविषादक्षोभम्) तात! दुर्ज्जन! मदङ्क-दुर्ललित! वीरगतिं गतोऽसि। गच्छ, वत्स! अहमप्यनुपदमागत एव। येन हि—

गान्धारादिविशेषदेशविजयाज्जातेन येनाभवं
सम्राजः किल दक्षिणो भुज इवाश्वासास्पदं शाश्वतम् ।
वङ्गेष्वद्य पराजयेन स चिरान्मानस्य मानो गतः
लोकानामुपहास्यदूष्यमधुना तज्जीवनं यातना ॥१॥

हन्त! प्रवीरः सन्तानः, दिगन्तपुष्पिता कीर्त्तिः, प्रगाढ़ः समुत्साहः, प्रबला च प्रभुशक्तिः, अद्यप्रभृति मन्दभाग्यस्य चिरायैव तिरोभूताः। प्रादुर्भूतास्तु—अभूतपूर्व्वो निर्व्वेदः, अजातपूर्व्वा लज्जा, असहनीयः सन्तापः, अचिन्तनीया ग्लानिः, अननुभूतो विस्मयप्रवाहः, अभावनीया च दुश्चिन्ता। अहो! ईदृशः खलु विषयः पूर्व्वमणुमात्रमपि न जातश्चिन्तागोचरः, यदङ्गीयानामद्भुतः सेनासमावेशः, असाधारण्येकता, अतुलनीयः स्वामिरागः, अनुकरणीया शिक्षा, अवसरानुसारी प्रहारः, चमत्कारिण्यायुधसृष्टिः, पुरुषोचितः समुद्यमः, अनुल्लङ्घनीया च सर्व्वतो नीतिः। विशेषतस्तु पृथुकोऽपि पृथुतमसत्त्वः खलूदयादित्यः, यदनेनास्मानात्मसैनिकैरवरुन्धता समुत्सार्य्य

नीयमाने वत्से न खल्वासीत् स्वसहायः पदान्तरमपि प्रत्यासन्नम्। (सविस्मयकरुणम्) हा धिक् !

सिंहं संहरता नवीनवनजेनाक्रम्य तुच्छात्मना
फुत्कारेण निपातितो गिरिवरस्तार्क्ष्योऽहिना ग्रासितः ।
लोकेऽस्मिन्नथवात्यसम्भवमपि प्राप्नोति वामो विधिः
गोपालोऽपि जिगाय जिष्णुमसमं कृष्णेन हीनं पुरा ॥२॥

अहो ! एष हि वङ्गवीरः सार्व्वभौमोचितगुणगरीयान् संवृत्तः, तदचिरादेव करिष्यति लोकहृदयाधिपत्यम्, उत्सादयिष्यति धर्म्मविप्लवम्, विताड़यिष्यति यवनदुर्जातम्, समर्जयिष्यति च भारतसाम्राज्यम्। मम पुनर्मन्दभाग्यस्य तातेनैव लुप्तो जातिधर्म्मः, तदुपरन्नैव दुःसहा लोकावज्ञा, यच्चावशिष्टं वीर्य्यार्जितं यशः, तच्चेदानीं सलेशमेवान्तर्हितम् । (सोन्मादमिव) हा हा ! अभूतपूर्व्वः पराभवः, अदृष्टपूर्व्वः परिच्चयः, अश्रुतपूर्व्वः परिभवः, अभूतपूर्वश्च कलङ्कभारः ।

अहह ! लोकापवादविकलस्य विकीर्णकीर्त्तेः
सञ्जीवितं विफलमेव हतोद्यमस्य ।
ज्योत्स्नापतेर्घनघटा पिहितस्य नूनं
अस्तं वरं हि परिलुप्तविकासशक्तेः ॥३॥

अस्मि चापमानग्लानो बलवदेव कुण्ठितः स्वपरपक्षेभ्यो मुखमपि दर्शयितुम् । तत् कुतो नाम चत्रप्रार्थनीया सम्मुख-सम्प्रहारमृत्युरनाप्युत्तमा गतिः स्यात्। आत्महत्या चान्ध-तामिस्रसंश्रयहेतुः । तदेकं वैराग्यमेवेदानीमधन्यस्य गतिः ।

प्रविश्य राघव। (सोद्वेगम्) अम्बरपते! अत्याहित-मुपस्थितम् ।

मान। (साशङ्कम्) किं नाम संवृत्तम् ?।

राघव। विजयावलेपादद्यास्मानेवाक्रमितुमुपासन्नो वैरिवर्गः।

मान। हतविधे! इदमपि श्रोतव्यमासीन्मानसिंहस्य। हा वत्स! दुर्ज्जन! क्वासि? परित्रायस्वेदानीं कर्त्तव्य-कुण्ठितं तातम्। हा प्रियतमाः सैनिकाः! क्व नाम विलीनाः?।

राघव। अम्बरपते! भारतेशदक्षिणहस्त! न युज्यते वैधुर्य्यं भवादृशो वीरधुरीणस्य।

मान। ब्रूहि प्रतिविधानमिदानीम्।

राघव। आक्रमतां प्रत्याक्रमणमेव प्रतिविधानम्।

मान। प्रत्याक्रमणं शक्तस्य प्रतिविधानम्, अशक्तस्य पुनः समूलनाशनिदानम्। अद्य तु वयमशक्ताः संवृत्ताः। पश्य—

षडंशाः सेनायाः क्षितिशयनमुपेता गतदिने
परिश्रान्ताः शेषा निजजयनिराशाः समभवन्।
तदद्य स्यादाजिर्निखिलविलयार्थाजिमसमा
न वेला बालूनां प्रवलसरितो वारणसहा ॥४॥

अतएवाद्य नूनमाक्रामन्ति दस्यव इति।

राघव। किं तर्हि प्रतिविधानमद्याभिप्रेतमम्बरपतिना?।

मान। सन्धिप्रस्तावः।

राघव। (सविषादम्) सर्व्वस्वपणेन?।

मान। अये कूपमण्डूक! नेदानीमपि वेत्सि महावीरौ-दार्य्यम्।

राघव । (अञ्जलिं बद्धा) यावद्‌ब्रवीमि—यद्यम्बरेशो मृष्यति धृष्टतां बालस्य ।

मान । (साकूतम्) आसन्नसङ्कटे ब्रूहि निःशङ्कम् ।

राघव । अस्तु नामोदारचेता, प्रतापादित्यः, सन्दधातु च मामात्मनः सामन्तं मन्यमानः पैतृकांशप्रत्यर्पणेन ; किन्तु वङ्गविहारोत्कलेषु पूर्णस्वाधीनतामन्तरेण कथमपि न वादसाहेन सह सन्धास्यति । तथा च सति पूर्व्वत एव विप्रतिपन्नस्य भारतस्वामिनः शुद्धहृदयेष्वेव भवत्सु गरीयानपरागः, महावीरशिरोमणेरक्षालनीयस्य लोकेषु कलङ्कलेपः । हन्त ! तर्हि वर्णशः सम्पद्यते भारविनिवेदितः पन्थाः ।

"शक्तिवैकल्यनम्रस्य निःसारत्वाल्लघीयसः ।
जन्मिनो मानहीनस्य तृणस्य च समा गतिः ॥"

मान । (निश्वस्य) अवबुध्यते तावन्नीतिवेदिनस्ते सर्व्वथा यथार्थवादः । किन्तूपासन्नसङ्कटे कः प्रत्युपायः ।

राघव । युद्धम्, भावान्तरेण युद्धम् ।

मान । अथ भावान्तरं तद्वेदितुमिच्छामि ।

राघव । महाराज ! भवतो निःशङ्कोक्तिसमादेशाद्‌ब्रवीमि ।

स्वयं देवो देवे सुत इव दयाधीनहृदया
कुसंस्कारादस्मादनिशमनुगच्छन्ति तरलाः ।
"हतः सोऽयं साक्षात्" इति परिरटन् सङ्कुलरणे
हते दीपे गेहं तम इव विपक्षं विजयताम् ॥५॥

मान। (सविस्मयमात्मगतम्) अहो! भीषणोऽयं विभीषणः प्रतापस्य। (प्रकाशम्) अये! कपटपटीयान् हि वङ्गीयो वीरहृदयेष्वपि समीहते स्वप्रतिविम्बमारोपयितुम्।

राघव। (सभयमिव) मृष्यतु महाराजः। अनन्योपायतया खल्वेवं ब्रवीमि।

मान। (सापरागमिव) अये! नास्तां तावदुपादेयः खलूपायः। तथापि—

वीरो वरं साधु जहाति जीवनं
न तु स्वकुलं कातरवद्व्यवस्यति।
स्वस्थो रवी राहुमुखं विशत्यपि
न सौरिवद्वक्रगतिन्तु गच्छति ॥६॥

राघव। महाराज! क्व वीरधर्म्माभिज्ञता चिरपराधीनतया तुच्छहृदयानाम्। किन्तु यदाह श्रीहर्षः—

"निषिद्धमप्याचरणीयमापदि
क्रिया सती नावति यत्र सर्व्वथा।
घनाम्बुना राजपथे हि पिच्छिले
क्वचिद्बुधेनाप्यपथेन गम्यते॥"

मान। कुमार! एकान्तमेव परिक्लान्तमस्मद्बलम्। तद्विरमतु तावदाक्रमतामद्य प्रत्याक्रमणम्, आस्ताञ्चोपन्यस्तोऽयमद्यैव छद्मप्रयोगः।

राघव। अम्बरपते! तनुजानातु कर्त्तव्यमिदानीम्।

मान। अद्य केवलमात्मत्राणाय प्रतिबन्धनमेव प्रतिविधानम्। तेन हि समन्तादेव शिविरस्य—

शतघ्नीनां श्रेणी निगरितुमिवारीनभिमुखी
निवेश्या, तत्पश्चाद्‌गज-तुरग-धानुष्क-पदगाः।
यथादृष्टं व्यूहोऽप्यचिररचनीयश्च, चतुराः
निदेश्याश्चाहर्त्तुं स्थलसलिलयानान्यनुचराः ॥६॥

राघव। यथाज्ञापयति महाराजः। (उत्थायात्मगतम्) श्रुतस्तावदात्मत्राणाय सेनानिवेशप्रकारः। यानाहरणन्तु कथम्। आं ज्ञातम्—अपक्रमणगूढ़ाभिसन्धिरयम्। (इति निष्क्रान्तः।)

मान। (सविषादम्) हन्त ! साम्प्रतिकमेवैतदनुष्ठितम्।

कुतः—

विहाय लज्जामुपगम्य दुर्यशः
प्रयाच्य सन्धिं परमाप्नुवन्नपि।
गतो भवेयं यवनैरहो हतः
क्षत्रस्य तस्मै मरणं रणे वरम् ॥८॥

यावदहमपि सन्नद्धशरीरः शस्त्रपाणिर्भवामि।

नेपथ्ये। कालि ! कालि ! कालि ! दानवद्राविणि। गुड़ुम् गुड़ुम् दुम्।

मान। (आकर्ण्य सोद्वेगम्) अहोवत ! सन्नाहावसरोऽपि नाधिगतः। (तारस्वरमाश्रित्य) भो भोः समोगत्नाः क्षत्रियाः !

अमविहितमपास्य देहजाड्यं
त्वरितमुपेत्य निसर्गतोग्रभावम्।
हरय इव हि वत्सकान् प्रबुद्धाः
जयत रयेण विधाव्य शङ्कितास्तान् ॥६॥

नेपथ्ये। आल्ला आल्ला आल्ला हो! गुड़ुम् गुड़ुम् दुम्।

पुनस्तत्रैव दिगन्तरे। हरि! हरि! हरि! हृषीकेश! गुड़ुम् गुड़ुम् दुम्। (पुनराल्लेत्यादि।)

पुनस्तत्रैव दिगन्तरे। हर! हर! हर! महादेव! गुड़ुम् गुड़ुम् दुम्। (पुनराल्लेत्यादि।)

मान। (विलोक्य सावष्टम्भम्) आः! समन्तादेव सन्निहिताः खल्वमी शत्रवः। (इति द्रुतं निष्क्रान्तः।)

अथ परिवर्त्तिते पटे प्रविशति युद्धसन्नद्धः प्रतापादित्यः, विभवतश्च वङ्गीयबलम्।

प्रताप। (साटोपम्) भो भोः सत्यसङ्कल्पाः साधूद्यमा वङ्गीयप्रवीराः! अयमेव नः शेषावसरः स्वदेशदुर्द्दशायाः, इदमेव शुभं मुहूर्त्तं जातीयजीवनारम्भस्य, एष एव सम्प्राप्तः समीचीनः परीक्षाकालः, अयमेव प्रशस्ततमः समयो दैत्यहत्यायाः, एष एव च साधीयानवसरो विजयवैजयन्ती-लाभस्य। तत्त्वरमाणा अतित्वरमाणाः खलु भवन्तः—

क्षिपन्तु गुलिकावलीमविरतं शतघ्नीशतात्
विशन्तु परमण्डलं तुरगिणो निजाम्मण्डलात्।
धुनन्तु ननु धन्विनो ध्वनितकोटिधन्वान्यतः
पतन्तु च पदातयः परशिरःपातिनः शत्रुषु ॥१०॥

(सर्व्वे। यथादेशमनुतिष्ठन्ति।)

प्रताप। (सावष्टम्भम्) हन्त! साधु प्रवृत्ताः, सत्य-

मूर्ज्जस्विनः, धन्याः स्वदेशभक्ताः, नवावताराश्च महाप्राणाः। अद्य भ्रुवमेवानुरज्यति विजयलक्ष्मीः, नूनमाशास्ते दास्यमुक्तिं जन्मभूः, हृष्यन्ति शुभानुध्यायिनो देवाः, नृत्यन्ति चामोदमग्नाः पूर्व्वपूरुषाः।

निहत निहत शत्रून् क्लान्त्यसारानधीरान्
कुरुत कुरुत कीर्त्तिं दिग्विदिक्कीर्त्तनीयाम्।
हरत हरत दुःखं जन्मभूमेः प्रभूतं
जयत जयत सर्व्वान् पाशवाचारशूरान् ॥११॥

नेपथ्ये। जयो महाराजप्रतापादित्यजयः।

प्रताप। (विलोक्य सहर्षादभुतम्) साधु वङ्गप्रवीराः! साधु। अनेन खलु युष्माकमवष्टम्भेन केचिदभिधावन्त एवाश्लिष्यन्ति भूपृष्ठम्, अपरे प्रहरन्त एव परिहरन्ति प्राणान्, अन्ये चाक्रामन्त एवापक्रामन्ति निर्वाधम्।

नेपथ्ये। जयो महाराजमानसिंहजयः, जयो दिल्लीश्वरजयः।

प्रताप। तत् कतमोऽयं जयोल्लासेनेत एवाभिधावति। (निरूप्य सावष्टम्भधैर्य्यम्) आं, स्वयमेव मानसिंहः। भो भोः सेनानीसैनिकाः! सत्वरमस्य पार्श्वयोः सैन्येषु प्रवर्त्तन्ताम्। यावदहमेवैनं परिरक्षामि। कुतः—

सम्मानी मानसिंहोऽयं माननीयो मनस्विभिः।
सूर्य्यमुदयन्तमादत्ते सूर्य्यकान्तः करं किरन् ॥१२॥

प्रविश्योद्यतक्रमो मानसिंहः। प्रताप! किमेतत्?।

प्रताप। (साकूतम्) किं हि नाम संवृत्तम् ? ।

मान। यत् खलु हिन्दुना स्मर्त्तुमपि न शक्यम् ।

प्रताप। ननु स्पष्टमभिधीयताम् ।

मान। नन्वयं राजद्रोहः ।

प्रताप। अहो ! ममायं राजद्रोह इत्यविदितराजधर्म्मणः प्रलापः । तथाहि—

अधीनो राज्ञः सन् यदपकुरुते द्रोह इति सः
न तु स्वाधीनस्य प्रसभपरदेशाक्रमविधिः ।
जयः स्वत्वे हेतुः स्मृतिरियमपेयादितरथा
तथा राजद्रोही भवति हि स दिल्लीपतिरपि ॥१३॥

मान। (अप्रतिभमिव) आस्तां तावदुपन्यस्तम् । किन्तु—

दिल्लीश्वरापितबलं प्रणयादुपेत्य
शास्त्रञ्च सभ्यनियमञ्च मदादपेत्य ।
तस्यैव राज्यहरणे कुमतिः प्रवृत्तः
पूर्णं निदर्शनमसीह कृतघ्नतायाः ॥१४॥

प्रताप। अपूर्व्वोऽयमलोकवादः । अमी हि प्रत्यक्ष-मोघ्यन्ते वङ्गीयसैन्याः, ते पुनर्भवतैव शिक्षिता नाम शतशश्च सङ्गीकृताः । तदद्भुतमिदं प्रत्यक्षमुद्भ्रान्तस्य । अहो !

दिल्लीशदत्तेन जितो बलेन
तदीयपापिष्ठनवाव एव ।
न शत्रुषु क्वापि भवानिवायं
मोहावृतो विश्वसितीति प्रतापः ॥१५॥

मान। (सोपहासम्) हन्त! श्रुतोऽयमद्य वङ्गेषु नूतनः कृतघ्नताप्रकारः।

प्रताप। अस्तु नाम। तथाप्यतिमातृद्रोहात् सहस्रधा श्रेयसीयं कृतघ्नता।

मान। अये! अनाकर्ण्य विशेषमसम्भवः सिद्धान्तवाद इति पृच्छामि—कतमा नाम तवातिमाता?।

प्रताप। अये! जन्मभूमिरेवातिमाता।

मान। (सहासम्) आः! स्वाधीनतेव तवेयमरूढ़ा शब्दसृष्टिः।

प्रताप। यौगिकी खल्वियं मे द्विविधैव सृष्टिः। तथाहि—

धत्ते मा दशमासमात्रमखिलानाजीवनं जन्मभूः
स्तन्यं यच्छति सा समाद्वयमियं भक्ष्यं चिरायाङ्कजम्।
बालेन प्रहृतैव तं प्रहरते सैषा तु सर्व्वंसहा
मातुर्भूमिरनेकधा गुरुतरा तेनातिमातोच्यते॥१६॥

मान। अये! कस्तामभिद्रुह्यति त्वमहं वा।

यः शान्तिं चिरसञ्चितामपहरन्नुत्तेजयन् वर्व्वरान्
उन्माद्यन् दहति च्छिनत्ति दलति स क्ष्मां नु विद्रुह्यति।
यो वा तं दमयन् स्थितिं नियमयन् लोकान् समुल्लासयन्
तां शान्तिं पुनरेव साधुसुहितः सत्साहसो धोत्सति?॥१७॥

प्रताप। नन्वहमपि तदेव पृच्छामि—तादृशो देशद्रोही शत्रुप्रमुग्धो भवान्? शत्रुभूतो भवत्स्वामी? लुप्तलक्ष्मीकामो देशवासो वा?। ("यः शान्ति"मित्यादि पुनः पठति।)

मान। आः! शत्रुः शत्रुरिति दुर्बोधाभिधेयो बालप्रलापः।

प्रताप। हन्त! अद्यापि तवायं दुर्बोधाभिधेयः। श्रूयतां तर्हि—जातिं धर्म्मं कुलगुणधनं जन्मभूमिञ्च दर्पात्

गच्छन्तस्ते श्वन इव पुनः प्रेष्यवृत्तिं दद्युर्ये।
तानेवैतान् घृणितयवनान् सेवमानः प्रसन्नः
जातः शत्रुस्त्वमपि सुमहान् देशजातिप्रियाणाम् ॥१८॥

मान। अरे हिन्दुकुलकलङ्क! सञ्चारितराजद्रोह!

शत्रुं पितेव हि विदन् निरवासयद्यं
येनैव धन्ततहितश्च हतः पितृव्यः।
यो राजदत्तविभवेन च तं दुनोति
धर्म्मस्य सभ्यजगतश्च स किं न शत्रुः ॥१९॥

प्रताप। आः प्रतापसिंहनिर्द्धृतमर्य्याद! पतितक्षत्रियापसद! न वयं शत्रूनपि मित्रीकर्त्तुं यवनभोगाय भगिनीमुपहरामः।

मान। अरे रे दुरात्मन्! महाकृतघ्न! पितृद्रोहिदस्यो! मामपि नाम मानसिंहमधिक्षिपसि?।

नाहं तव प्रणयमुग्धवसन्तरायः
नो वा विलासविकला यवना जिता ये।
दृष्टोऽस्तमर्द्दनपरः स हि मानसिंहः
आरण्यक! प्रसभदण्डधरस्तवायम् ॥२०॥

प्रताप। अरे अरे जातिधर्म्मदेशद्रोहिन्! अस्पृश्य! क्षत्रियकुलकदन! मामप्यात्मानं परिचाययसि?।

वसस्युदग्रे यदि पर्व्वताग्रे
चरस्यथो वा गह्वनप्रदेशे ।
निहंसि वा यद्यपि मूढ़जन्तून्
तथापि सिंहः पशुरेव नान्यः ॥२१॥

मान। (सोन्मादमिव) आः पापिष्ठ! तिष्ठ तावत्। भो भोः समोगलाः चत्रियवीराः! किं पुनरुपेचन्ते भवन्तः।

वङ्गेष्वद्य चिरास्तमेति भवतां कीर्त्तिर्जगत्कीर्त्तिता
दिल्लीशस्य यशःशशी चयमितः सद्यः समापद्यते।
एषां शेष-शरीर-लेशमसतां नेतुं भुवो रेणुतां
आविश्यन्तु विचूर्णयन्तु झटिति च्छिन्दन्तु भिन्दन्त्वपि ॥२२॥

नेपथ्ये। आल्ला आल्ला आल्ला हो! जयो महाराज-मानसिंहजयः।

प्रताप। (उत्साहोष्मण इव) अहो अहो अजेयोजस्विनः सत्यसङ्कल्पा वङ्गीयप्रवीराः! पश्यत युष्माकं जन्मभूमिलोलुपा धावन्त्यमी दुर्द्दान्तदैत्याः, अभिद्रवन्ति चास्पृश्यपिशाचाः। तत् कथमपेचन्ते भवन्तः? । प्रपतत or क्रमध्वं — should be the text.

सिंहायध्वं भुजगहरिणिष्वाक्रमायोत्पतन्तः
वज्रायध्वं यवनगिरिषु ध्वंसयन्तः शिरांसि ।
सिन्धूयन्धं शिविरनिकरे दुर्द्दान्तां प्लावयन्तः
सूर्य्यायन्धं निबिड़वितते मानसिंहान्धकारे ॥२३॥

नेपथ्ये। कालि! कालि! कालि! दानवद्राविणि! जयो महाराजप्रतापादित्यजयः।

(इति साटोपं निष्क्रान्तो भिन्नद्वारेणोभयवर्गः।)

प्रविश्य सत्वरमुद्दतक्रमः शङ्कर। भो भोः प्रतापप्राणाः सहचारिणः कायस्थसैन्याः! विच्छिद्यतां विच्छिद्यतां मध्यभागः, प्रविश्यतां प्रविश्यतां व्यूहाभ्यन्तरम्, उन्मथ्यतामुन्मथ्यतामाततायिश्रेणी, उन्मोच्यतामुन्मोच्यतां जन्मभुवो वक्षःशैलम्।

नेपथ्ये। हर! हर! हर! महादेव! जयो महामात्यचक्रवर्त्तिनो जयः, जयो महाराजप्रतापादित्यजयः।

शङ्कर। (सोल्लासम्) अहो अहो साधु समारब्धम्, तीव्रमुपक्रान्तम्, सत्साहसमनुष्ठितम्, जात्यानन्दमुज्ज्वलीकृतम्, देशगौरवञ्च परिरक्षितम्।

नेपथ्ये। आल्ला आल्ला हो। जयो महाराजमानसिंहजयः, जयो दिल्लीश्वरजयः।

शङ्करः। (विलोक्य सोद्वेगम्) हा हा कथं मोगलबलैः समाक्रान्तो महाराज एव दुरात्मना मानसिंहेन।

नेपथ्ये। हरे! हरे! हरे! हृषीकेश! जयो महावीरसूर्य्यकान्तजयः, जयो महाराजप्रतापादित्यजयः।

शङ्करः। (निरूप्य सानन्दम्) हन्त! हन्त! उपस्थितोऽयमायुष्मान् ससैनः सूर्य्यकान्तो महाराजसाहाय्याय। अधुना तु—सूर्य्यकान्तसहायं को वङ्गेश्वरमभिद्रवेत्।

आयाते हि महावाते नाक्रामेद्‌गगनं घनः ॥२४॥

भो भोः साहसप्रसाधना वङ्गीयप्रवीराः! एकत्र स्वाधीनतास्वर्गकन्या सप्रणयं वः कुसुमरथेनाभ्यर्थयते, अन्यत्र पराधीनता-

राक्षसो साटोपं ग्रसितुमाननं व्यादत्ते । तदयं विवेचनीयो भवद्भिः सन्धिक्षणः स्वावस्थायाः ।

(पुनर्विलोक्य साकूतम्) अहो ! दारुणो दारुणः प्रवृत्तोऽयं सम्प्रहारः । नूनमद्यैव यास्यति पर्य्यवसानमद्यतनः संग्रामः ।

तथा च— अभ्येति गर्जति दधाति तिरस्करोति
व्याहन्ति हन्ति विभिनत्ति पतत्यपैति ।
अद्य क्रियाविनिमयाभिनयं नियत्याः
साक्षादसौ विरचयत्युभयैव सेना ॥२५॥

नेपथ्ये सम्मुखतः । जयो महामात्यजयः, जयो महाराजप्रतापादित्यजयः ।

शङ्कर । (अवलोक्य सानन्दम्) साधु, अस्मत्सहचारिणो दुर्वारवेगाः प्रवीराः ! साधु । आमर्द्यमाना हि भवद्भिर्निर्वाधमपक्रामन्ति शत्रवः । अहो ! विन्यस्तो हि महाराजेन सुधासु शिविरध्वंसभारः शत्रूणाम् । तत् कथमद्यापि नाश्निष्यति वैश्वानरः पटमण्डपानमीषाम् ? ।

नेपथ्ये वामतः । जयो महाराजप्रतापादित्यजयः ।

शङ्कर । तत् कथमकस्माज्जयोल्लासो वङ्गीययोधानाम् । (निरूप्य) हन्त ! प्रायेण सेनान्यः परितः सञ्चरन्ति वङ्गेश्वरम् । तथा च—

सेनानाथः पुरस्ताद्दलितरिपुबलो दुर्जयः सूर्य्यकान्तः
प्राच्यः शूरः प्रतापः सुखमयमदनौ भिल्लवीरो रघुश्च ।

प्रत्येकं चालयन्तः खरमसियुगलं सैन्यमुत्साहयन्तः
छिन्दन्तो दारयन्तः प्रसभमरिबलं प्रभ्रमन्त्यश्ववाराः ॥२६॥

साधु साधु। अमुना च नौसेनानायकेन—

इतः पुनः पोतसमूहमध्यतो
बृहच्छतघ्नीगुलिकाभिरम्बरे।
यमस्य यानार्थमरातिपातिनो
महापथा वह्निमयाः कृता इव ॥२७॥

(पुनरवलोक्य सोल्लासम्) हन्त! हन्त! भग्नं द्विषद्दलम्। तथा च—सर्व्वथा विपन्नं विध्वस्तञ्चेदम्। केचिदपसरन्ति मुक्तकच्छाः, अपरे कियदपसरन्त एव निपतन्ति विदीर्णदेहाः, अन्ये चापसर्त्तुकामा एव शेरते छिन्नकण्ठाः, एके च पलायनोपायमपश्यन्त एव प्रहर्त्तुमीहन्ते लूनचरणाः, केचन पुनरपधावन्तः समाहूयमाना अपि नापेक्षन्ते सुहृदो वेदनादूनदेहाः। अमी चोत्प्लुत्य पतन्ति सरिज्जले, पतन्त एव सन्तरन्ति, सन्तरन्त एवोन्मज्जन्ति, निमज्जन्ति च तरङ्गेषु, केचित्तु निमज्जन्तो न पुनरुत्तिष्ठन्ति। (सकरुणम्) हा हा! कथमत्रापि महान् प्रमाथो विपन्नानाम्, यदजस्रगुलिकावलीयमुन्मज्जत एव चिराय निमज्जयति। (ससम्भ्रमम्) तत् कथमकस्मात् प्रसरति पिङ्गलालोकः। (विलोक्य) आः! समासञ्जितोऽयमस्मद्दलैर्भीषणो हुताशनः पटमण्डपेषु द्विषताम्। अत्र हि—

स्फुरति शिविरसञ्चयेऽग्निपुञ्जः
परित इतीष यशोरनाथतेजः।

यवनकृत-कु-शासनोत्थपाप-
प्रचयमिवोद्गिरतीह धूमराशिम् ॥२८॥

झटिति प्रविश्य प्रतापादित्यः। (श्वेतपताकामुद्धूय) सेनापते! सूर्य्यकान्त! रणोन्मत्त!

विरम विरम भूयः प्राणिहत्याविधानात्
विरमय तरिसेना-नायकञ्चापरांश्च।
अपसृत-हत-शेषानाशु वन्दीकुरुष्व
विचिनु च परितोऽसौ मानसिंहः क्व यातः ॥२९॥

शङ्कर। (दृष्ट्वा सहर्षमालिङ्ग्य) नूनमद्यैव नाम महाराजेन बङ्गेषु समारोपितं साम्राज्यम्।

प्रताप। (प्रत्यालिङ्ग्य) वयस्य!

सिंहो न यावद्विहृतोऽतिविक्रमो
किमाधिपत्यं गहनेऽत्र रोपितम्।
शेषो विशेषेण परं विवर्द्धिनां
ऋणाग्निरोगद्विषतां भयावहः ॥३०॥

भवतु। वृथेदानीमयं दहनव्यापारस्तदुपसंह्रियतामसौ।

शङ्कर। भो भोः सेनान्यः! एष महाराजः समाज्ञापयति— "पर्य्यवसितस्तावदद्यतनः संग्रामस्तन्नवीनो नासज्यतामासन्नश्च निर्वाप्यतामग्निः, संगृह्यताञ्च विपक्षोपेक्षितः समरसम्भार" इति।

प्रविश्य सूर्य्यकान्तः। (उभाभ्यामेव सप्रणामम्) धिक्! अयोग्ये विन्यस्तमिदं सैनापत्यम्।

उभौ। कथमिव?।

सूर्य्य। येन हि—

सामग्रीः समुपनयन् युधः समग्राः
निर्गच्छन् सबलमितः स मानसिंहः।
अर्कोऽस्यन् करमिव तीव्रमग्निराशिं
वङ्गानामनुसरतामभूददृश्यः॥२१॥

प्रताप। सेनापते! लोकोत्तरकर्म्मन्! न खलु पर्य्याप्त स्तवायं निर्वेदहेतुः। अद्य हि मानसिंहेन प्रथमत एवात्मनो बलम्, विश्रमितुमिव श्रमितुमनुज्ञातम्, अपक्रमितुमिवाक्रमितुमुपदिष्टम्, अपसर्त्तुमिवोपसर्त्तुमाम्नातम्, जीवितुमिव मर्त्तुमुत्साहितम्, आहर्त्तुमिव च प्रहर्त्तुमुत्तेजितम्, आत्मना चायुधादप्यधिकं वाङ्मात्रेण कलहायितम्।

सूर्य्य। तथापीत्थमपर्य्यालोचनमेव नः प्रात्मनः प्रमादः।

प्रताप। मा मैवम्।

क्षत्रो वरं संयति मृत्युमिच्छति
न वैतसीं वृत्तिमुपेत्यपैति वा।
चिरन्तनीयं दृढ़धारणा हि नः
व्यतिक्रमोऽयन्तु धियामगोचरः॥२२॥

सूर्य्य। यवनीकृतात्मनः परिलुप्तैव सा क्षत्रियता मानसिंहस्य।

शङ्कर। कृतं तावदतीतानुतापेन। अद्याप्यवशिष्यत एव हि प्रायेण लक्षं द्विषत्सैनिकानाम्। तेन तु—

व्यूढानीकैरविरतसमितसज्जितैरप्रमत्तैः
अस्मिन्नेव चपितशिविरे स्थेयमस्माभिरद्य।
सन्देग्धव्यः स हि खलु खलः शौर्य्यवान् मानसिंहः
सर्पः सर्पं न् दशति शयितं ताड़ितो हि प्रमुग्धम्॥२३॥

सूर्य्य। वाढ़म्। बलवदावश्यकोऽयं प्रकारः।

प्रताप। ध्रुवमुपपन्ना सूक्तिरियं नीतिज्ञस्य।

शङ्कर। (विलोक्य) अत्रभवानुपाध्यायः संप्राप्तः।

अथ प्रविशति जपव्यापृतहस्तो माधवचन्द्रः।

सर्व्वे। आर्य्य! अभिवादये भवन्तम्। (इति प्रणमन्ति।)

माधव। वत्साः! चिरजीविनो नित्यविजयिनश्च भूयास्त।

प्रताप। सत्यवाचामाशिषः सर्व्वथा फलवत्त्वमाशास्महे।

माधव। अपि सर्व्वतः कल्याणं जन्मभुवः सुसन्ततीनाम?।

सूर्य्य। अस्त्येवमार्य्यपदप्रसादात्।

माधव। ननु सर्व्वथा विजितो बलावलिप्तो मानसिंहः?।

शङ्कर। (सहर्षम्) अथकिम्।

प्रताप। अद्य यावद्भवतामाशीःप्रभावात्।

माधव। (सविस्मयानन्दम्) हन्त! स्वस्त्ययनव्यापृतोऽपीममिव ब्रह्मानन्दमधिगन्तुमुपागतोऽस्मि समराङ्गने। (प्रत्येकमालिङ्ग्य)

आशालता फलवती ध्रुवमद्य जाता
सत्याशिषश्च गुरवोऽद्य हितैषिणस्ते।
सन्तानपोषणरता चिरदास्यपाशा-
दुन्मोचिताद्य जननीसमजन्मभूमिः॥२४॥

प्रताप। आर्य्य! इयं हि नामैकताप्रसूता फलसम्पद्भवास्तव्यानाम्।

माधव। (सविस्मयमिव) हन्त! हिन्दूणामपि भिन्नवृत्तीनामियमैकता परं देवताप्रसादनिदानैव वङ्गीयानाम्।

शङ्कर। वयस्य! अपि स्मर्य्यते प्रथमदर्शन एव मामकमुक्तिजातम्?।

प्रताप। अथकिम्।

माधव। वत्स! किमन्यत् प्रियमस्ति प्रार्थनीयम्?।

प्रताप। आर्य्य! अतः परमपि प्रियमस्ति। तथापीदमस्तु—

भरतवाक्यम्।

मुक्तेरप्यधिकास्तु भक्तिरुचिता जन्मावनौ जन्मतः
वङ्गानां चिरभिन्नभिन्नमनसां नित्या भवत्वेकता।
ईतिर्नश्यतु रीतिरस्तु रुचिरा नीतिः सती जायतां
शिष्टानुग्रह-दुष्टनिग्रहविधिं देशश्चैव चालम्बताम् ॥२५॥

(इति निष्क्रान्ताः सर्वे।)

—:०:—

प्रतापविजयो नाम अष्टमोऽङ्कः।

समाप्तमिदं वङ्गीयप्रतापनामकं नाटकम् ॥०॥

———०———

इतिहासपरिशेषसंक्षेपः।

प्रतापादित्यो मानसिंहेन सह प्रथमदिनद्वितीयदिन-युद्धयोर्विजयवैजयन्तीमलभत। द्वितीयदिनयुद्ध एव च वङ्गीय-प्रतापं नाटकं समाप्तिमाप्तम्। तृतीयदिवसे तु समराङ्गन-स्योत्तरस्यां दिशि प्रतापादित्ये युध्यमाने राघवरायमन्त्रणया कूटकौशली मानसिंहः सङ्कुलयुद्धकाले अपराह्णे समराङ्गनस्य दक्षिणस्यां दिशि प्रतापादित्यो निहत इति सोल्लासं मिथ्या प्रचारयामास। तेन च तत्र जातो वङ्गीयसेनायाः सङ्घभङ्गः; यावच्च तत् संहतिविधानाय प्रतापादित्यो दक्षिणां दिशं धावितः, तावदुत्तरस्यामपि दिशि तथा मिथ्या प्रचारात् तत्रापि तादृगेव वङ्गवाहिन्यां विशृङ्खलता समजनि। अनया च विशृङ्खलया हताशतया च बहव एव सेनापतयो निहताः; प्रतापादित्यश्च वन्दीकृतः, विध्वंसिता च धूमघाटनगरी। क्रमेण च प्रतापादित्यो लौहपिञ्जरे निधाय गजपृष्ठेन नीयमानो वाराणसीं यावद्गत एव पञ्चत्वं गत इति।

मिवारप्रतापम् ।

(नाटकम्)

—:०ः—

वियोगवैभवम् ।

(खण्डकाव्यञ्च)

—०—

महामहोपाध्याय-महाकवि-भारताचार्य्य-

श्रीयुक्तहरिदाससिद्धान्तवागीशभट्टाचार्य्य-

प्रणीतम् ।

—०—

कलिकाता ४१ संख्यक-देवलेन-नामक-

वर्त्मस्थ-सिद्धान्तविद्यालयात्

श्रीहेमचन्द्रतर्कवागीशभट्टाचार्य्येण

प्रकाशितम् ।

—०—

१३५४ वङ्गाब्दे

चौराग्रहायणमासे ।